CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धिकरणैर्धर्म्मैः सर्व्वैश्च समानासमानाधिकरणैः सम्बन्धैरवच्छिद्यन्ताम्, आकाशाभाव एव वा तथास्तामिति। नैवम् एवं हि तत्तद्देशकालावच्छिन्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिताकत्वसम्भवेन तत्तद्भेदोऽपि विलुप्येत। तत्तत्प्रतियोगिकत्वं तत्तत्स्वभावो न च तत्ताधिकरणवृत्तित्वस्यान्तर्भावोऽवच्छेदकत्वञ्चेति समानम्। अतएव सामान्य-

---

पकालयो: संयोगरूपात्यन्ताभाववारणम्। अभावावच्छेदकानामानन्त्यात् प्रतियोगिन एव तद्वाच्यमित्याह, अनवच्छिन्नेति। यद्वा स्वावच्छेदकानवच्छेदकयोरल्पत्वानल्पत्वाभ्यां लाघवान्मतभेद:, तथाच स्वावच्छेदकदेशकालयोरल्पत्वं तत्र तदवच्छिन्नत्वमधिकरणस्य वक्तव्यं यत्र त्वनवच्छेदकयोरल्पत्वं तत्र स्वानवच्छेदकावच्छिन्नत्वमधिकरणस्य वक्तव्यम्, वृत्तित्वविशिष्टे एवमुत्पत्तिकालावच्छिन्नपर्य्याप्तवृत्तित्वविशिष्टे वह्नित्वावच्छिन्नप्रतियोगिताकत्वमिति वाच्यं व्याप्यवृत्तिगोत्वाभावादौ घटादिवृत्तित्वविशिष्टे गोत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वमिति। अतएव घटपटगोत्वाश्वत्वेत्यादि यथा संख्येन वक्ष्यति, विशिष्टस्य तत्त्वे भावाभावकरंवितत्त्वादनुभवविरोध इत्यत आह, तदवच्छेदेनेति। कल्पद्वयं निषेधयति अन्तर्भाव इत्यादि। एतत्कल्पत्वमुभयतोऽपि परिष्कृतं दूषयति, अतएवेति। यत एव तत्-

State Museum Library Lucknow 5116

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि प्रत्युक्तम्, अव्यासज्यवृत्तेस्तत्स्वभावस्य तत्रानुपपत्तेरतिरिक्तकल्पने च किमपराद्धमतिरिक्ताभावेन।

किञ्च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद्व्यधिकरणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोऽपि स्यात्, अपि च रूपान्तरेण सम्बन्धविधया वा व्यासज्यवृत्तिधर्म्मस्य ज्ञानेन यावदाश्रयसन्निकर्षापेक्षा मानाभावात्, एवञ्च एकाभावसन्निकर्षेऽपि सामान्याभावबुद्धिप्रसङ्गः, यादृशे च तस्य ज्ञाने यावदाश्रयाणां सन्निकर्षोऽपेक्ष्यते,

---

स्वभावो न तत्राधिकरणनिवेशनमित्यर्थः। ननूक्तमेव सम्भवति चेदमित्यादिना प्रतियोगिता अतिरिक्तेति तस्या एव व्यासज्यवृत्तित्वं कल्प्यं नातिरिक्ताभाव इत्यत आह, किञ्चेति। ननु निरधिकरणाभावप्रतीतिर्नास्त्येव व्यासज्यवृत्तिधर्म्मस्यैव तदधिकरणावृत्तित्वे तत्र प्रतीतिरितिपूर्व्वापरितोषादाह, अपि चेति। रूपान्तरेणेति। प्रमेयत्वादिना तथाभाने न तदपेक्षेत्यर्थः। ननु व्यासज्यवृत्तिधर्म्मस्य लौकिकप्रत्यक्ष एव यावदाश्रयसन्निकर्षापेक्षा तत्र च तद्विषयत्वं प्रकारतया सम्बन्धविधया वेत्यन्यदेतत्, अत एव संयोगसंसर्गकदण्डीति भानं दण्डपुरुषसन्निकर्ष एवेत्यत आह, यादृशे चेति, तस्येति। व्यासज्यवृत्तिधर्म्मस्येति व्यासज्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र तेषां तद्भेदस्य च ज्ञानमपि तदज्ञाने तदभेदज्ञाने च तदग्रहात् आश्रयभेदभ्रमेण तद्भ्रमदर्शनाच्च। न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः सम्भवति, तत्प्रतियोगिनां विशेषतोऽनुपस्थितेरिति दिक्॥ ४॥

केचित्तु अनन्तविशेषाभावानां सामन्यावच्छिन्न-

धर्म्मस्येत्यर्थः। तेषामिति। यावतामाश्रयणामित्यर्थः। तद्भेदः आश्रयभेदः। तदज्ञाने यावदाश्रयाज्ञाने, भेदज्ञानव्यतिरेकात् कार्य्यव्यतिरेकमाह, तदभेदेति। तदग्रहात् व्यासज्यवृत्तिधर्म्माग्रहात्, दृढ़ीकर्त्तुं व्यतिरेकमुक्त्वाऽन्वयमप्याह, आश्रयभेदेति। प्रकृतैं उपपादयति, न चात्रेति। विशेषत इति। तत्तदत्यन्ताभावग्रहे तत्प्रतियोगिज्ञानस्यावश्यकत्वादिति। ननु व्यासज्यवृत्तित्वं द्वित्वसंयोगप्रकृतप्रतियोगितापि साधारणं नैकं तत्कथं सामान्येन कार्य्यकारणभावग्रहः, विशिष्य तु कार्य्यकारणभावे प्रकृतप्रतियोगितायां तथोपपादने साधकाभाव इत्यत आह, दिगिति। यत्तु पर्य्याप्त्याख्यसम्बन्धनियतविषयताविशेषमादायैव सामान्येनैव व्याप्तिरिति। तन्न तत्तत्पर्य्याप्तेरपि तत्तत् स्वरूपसम्बन्धरूपत्वादिति। दिगर्थस्तु तादृशप्रतियोगिताभावयोरतिरिक्तत्वकल्पने विनिगमनाविरह एवेति, अतएव सार्व्वभौममतेऽपि वक्ष्यत्यप्रत्यूहैवेति॥ ४॥

सार्व्वभौममतमुद्घाटयति, केचित्त्विति। स व्यासज्यवृत्तित्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पना-मपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताकत्वे-नैक एवाभावः कल्प्यते कल्पनीयशरीरस्योभयत्र तुल्यत्वेऽपि एतदपेक्ष्य तस्य गुरुत्वात्, विनिगमना-भावेऽपि च सामान्याभावसिद्धिरप्रत्यूहैव, धर्म्मकल्पना-तोधर्म्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तम्।

प्रकृतप्रतियोगिताव्यासज्यवृत्तित्वं, ननु भवताप्यतिरिक्तोऽभावः कल्प्यत इत्यत आह, कल्पनीयेति। उभयत्वेऽपि धर्म्मिकल्पने धर्म्मकल्पनेऽपीत्यर्थः, एतदपेक्ष्येति। सामान्याभावं तत्सामान्यावच्छि-न्नप्रतियोगिताकत्वमपेक्ष्य बहूनां तथा कल्पने गौरवमित्यर्थः। ननु सामान्यावच्छिन्नप्रतियोगिताकत्वकल्पनं किमर्थं संसर्गस्य संस-र्गकल्पने प्रयोजनाभावात्, किन्त्वेकैव प्रतियोगिता सैव सामान्या-वच्छिन्ना बहूनां संसर्गरूपेत्यत आह, विनिगमनेति। अयमर्थः एकप्रतियोगिताबह्वभावनिरूपिता वा कल्प्यते क्लृप्तबहुप्रति-योगितानिरूपित एक एव वाभावः कल्प्यत इति विनिगमनाविरह इति। इदं पुनरापातत एव, वस्तुतस्तु सिद्धे सामान्याभावे लाघवा-देकैव प्रतियोगिता कल्प्यते अतएवावच्छेदकलक्षणेऽपि तथैवोक्त-मिति। नन्विदमेव विनिगमकं यत्प्रतियोगिताया धर्म्मरूपत्व-मभावस्य धर्म्मिरूपत्वमिति तदुक्तं धर्म्मिकल्पनातो धर्म्मकल्पनाया लघुत्वमिति अतएवाह, धर्म्मकल्पनात इति। तथाच धर्म्मिणां बहूनां कल्प्यत्वे बहुकल्पनम् एकस्यैव धर्म्मस्य कल्पनमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानन्तवाय्वाद्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य क्लृप्तानन्तवाय्वाद्यधिकरणवृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनैव लघीयसीति वाच्यम् एवं सत्यभावमात्रासिद्धिप्रसङ्गादित्याहुः ॥ ५ ॥

इति तत्त्वचिन्तामणि-दीधितौ सामान्याभावः समाप्तम् ।

लाघवमेव तन्मूलम्, प्रकृते तु धर्म्मस्वरूप एवेति न तदवतार इति । एवं सतीति । घटाभावस्तावदेकोऽधिकः कल्प्यः, तस्यानन्ताधिकरणवृत्तित्वं च कल्प्यं तदपेक्ष्य क्लृप्तानन्ताधिकरणानामेव तथा प्रतीतिनियामकत्वमित्यभावमात्रासिद्धिरित्यर्थः । केचित्तु प्रतिबन्धकाभावस्य कारणतायां तावदनन्ताभावानां कारणत्वं कल्प्यत इत्यतिरिक्तसामान्याभावस्य वा । एवम् अभावघटितशक्तिकल्पने तावद्विशेषाभावानां वा तथात्वं कल्प्यते सामान्याभावस्य वेत्यत्र इत्यमेव लाघवं तर्कमाहुः ॥ ५ ॥

इति महामहोपाध्याय-कृष्णदाससार्व्वभौम-प्रणीताया-मनुमानदीधितिप्रसारिण्यां सामान्यभाव-व्यवस्थापनं समाप्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ विशेष-व्याप्तिः ।

तत्त्वचिन्तामणिः ।

यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यं यत्समानाधिकरणान्यान्योभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्कत्वं वा । अन्यवृत्तिवह्नितद्वतो-

दीधितिः ।

यद्वेत्यादि । अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः । न च तत्र रूपवत्त्वादिकमेव साध्यं तच्च परम्परासम्बन्धेन रूपत्वादिकमेव तेन च सम्बन्धेन न तदभावः पृथिव्यादाविति वाच्यं रूपादेरसाध्यतापत्तेः द्रव्यान्यत्वादिविशिष्टसत्त्वाद्य-

प्रसारिणी ।

नानाव्यक्तीति । एकव्यक्तिहेत्वधिकरणके तदभावस्याभावादित्यर्थः एकव्यक्तीति । नानाव्यक्तिके तु यद्धेत्वधिकरणे या साध्यव्यक्तिस्तयोरेव व्याप्तिर्वक्तुं शक्यत इति भावः । यन्नपतिमतं निराकरोति, न चेति । रूपादेरिति । तथाच रूपमनुमिनोमीत्यनुभवविरोध इति भावः । ननु रूपत्वादिकमिति दण्डादिसाध्यकगतिरेवात्रापि भविष्यतीत्याह, द्रव्यान्यत्वेति । अन्यथा विशिष्टा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रन्यवृत्ति-धूमवन्निष्ठात्यन्ताभावान्योन्याभाव-प्रतियोगित्वाद्व्यधिकरणवह्निधूमयोर्न व्याप्तिः किन्तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना। न चैवं धूममात्रे न व्याप्तिरिति वाच्यं सर्व्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात्, धूमसम्बन्धिवह्निस्तद्व्याप्य एव, युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव, कर्म्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः। यद्वा प्रतियोगिवैयधिकरण्या-

---

भावस्य द्रव्यादिवृत्तित्वात् सत्त्वादिसाध्यकद्रव्यत्वादावव्याप्तेश्च, अन्यथा विशिष्टतया सत्तादेः साध्यत्वे व्यभिचारिणि जातिमत्त्वादावतिप्रसङ्गात्। व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यप्रतियोगिकत्वं द्वित्वाद्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च। अथाप्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतौ, अस्ति चायं रूपादौ रूपत्वादिना

भावस्य विशेष्याप्रतियोगिकत्वे। ननु कथमतिप्रसङ्गः विशिष्टतया सत्त्वादेः साध्यत्वेऽपि विशिष्टमन्यदेवेत्यत आह, व्युत्पादयिष्यत इति। दण्डितया पुरुषो नास्तीति विलक्षणानुभवादित्यर्थः, अनुभवे विवादादाह, द्वित्वेति। तथाच वह्निमान् धूमादित्यत्राव्याप्तिरित्यर्थः, उभयाभावस्य विशिष्टाभावरूपत्वं पूर्व्वमेव खण्डितमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणं कर्म्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव। न चान्योन्याभावस्याव्याप्यवृत्तित्वम् अभेदस्याबाधितप्रत्यभिज्ञानात्। व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैव भातस्य षष्ठ्यर्थत्वं न चैवमननुगमो दोषाय कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात्।

न पृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न, तादृशप्रतीत्या हि रूपत्वादौ प्रतियोगिताया अवच्छेदकत्वाभावो गृह्यते न तु तदभावावच्छेदकत्वं सर्व्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रूपे तदभाव इत्यबाधितप्रत्ययात् अन्यथा यो यो धर्म्मो यस्य यस्य नावच्छेदकः तत्तदवच्छेदेन तत्तदभावोऽप्युक्तरीत्या सिध्येत ॥ ६ ॥

प्रगल्भमतं निराकर्त्तुमाशङ्कतेऽथेति। ननु पृथिव्यादिनिष्ठाभावप्रतियोगित्वस्य प्रतियोगिन्यविषयीकरणात् कथमवच्छेदकत्वाभावविषयीकरणे नान्यथासिद्धिरित्यत आह, सर्व्वत्रैवेति। तथाचानेन बाधकेन तृतीयोल्लिखितावच्छेदकत्वस्यैव प्रतियोगित्वेन विषयीकरणं कल्प्यत इति भावः। अन्यथा, तेन रूपेण प्रतियोगित्वाभावविषयीकरणम् ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रमेयधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमितिप्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वाच्च। अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षितञ्चात्र तथेति चेत्, असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकं कम्बुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति वहुव्याकोपश्च। अतएव प्रमेयधूमत्वं गौरवेन प्रतियोगिताया इव तच्छून्यताया अपि नावच्छेदकमित्युक्तावपि न निस्तारः। अत्र वदन्ति अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्म्मवत्त्वं न चैवं

सिद्धेरदित्यत्रेष्टापत्तौ अनिष्टमाह, प्रमेयधूमत्वेनेति। तथा, सामानाधिकरण्यप्रतियोगितावच्छेदकत्वम्, असमानाधिकरणेति। वह्निमान् धूमादित्यत्रायोगोलकीयवह्नेर्धूमासमानाधिकरणतयावह्नित्वस्य तद्वृत्तित्वेन सामानाधिकरण्यावच्छेदकत्वहानिरित्यर्थः। अतिरिक्तवृत्तित्वेन तदनवच्छेदकत्वमुक्त्वा गौरवेणानवच्छेदकत्वमाह, कम्बुग्रीवादीति। ननु प्रमेयधूमत्वं यथा प्रतियोगितानवच्छेदकं तथा प्रतियोगित्वाभावस्याप्यनवच्छेदकं वाच्यं सामानाधिकरण्यांशे चावच्छेदकत्वमविवक्षितमेवेत्याशङ्क्य दूषयति, अतएवेति। अतएव कम्बुग्रीवादिमत्वादेरप्यनवच्छेदकत्वप्रसङ्गादेवेत्यर्थः। न च पारिभाषिकावच्छेदकत्वमेव वक्तव्यम्। तथापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्व्वस्मादभेदः तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्य्यात्। घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योन्याभावात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित् ॥ ७ ॥

अत्यन्ताभावगर्भवत्सामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह, यत्समानाधिकरणेत्यादिलक्षणद्वयेन, प्रथमे एकस्य साध्याधिकरणांशस्याधिक्यात् द्वितीयलक्षणम्, अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले

तत्तद्रूपत्वादेरतिरिक्तवृत्तित्वेन रूपत्वस्य रूपसाध्यकव्यभिचारिण्यतिप्रसङ्गात्, तात्पर्य्यादिति। पूर्व्वत्र साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यस्य हेतुतावच्छेदकावच्छिन्नयावद्धेतोर्व्याप्तित्वादिति अत्र तु तत्तद्व्यक्त्योरेवेति, घटकयोरिति। अनवच्छेदकमित्यत्र घटकयोरित्यर्थः। कश्चिदित्यस्वरसोद्भावनं तद्बीजन्तु सामान्यविशेषलक्षणानुपपत्तिरिति ॥ ७ ॥

प्रथम इति। प्रतियोगियद्वन्न भवति तेन समं सामानाधिकरण्यमित्यत्र तदधिकरणाधिकरणत्वमित्यर्थस्तत्र तदधिकरणपदं व्यर्थम्। यद्वत्तत्त्वं तद्वृत्तित्वमित्यत एव सामञ्जस्यादिति। तद्वत् वह्निसंयोगवत्, साक्षाद्वङ्गारादौ। परम्परया शेषयोः। ननु शेषयोर्न शङ्क्यं तत्र साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्न-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्तत्साध्यवतस्तत्तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्योन्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चाव्याप्तिः, तथापि यद्रूपावच्छिन्नवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्य्यम् । वह्न्यादौ तत्संयोगादौ तद्दादौ वा साध्ये सर्व्वत्र साक्षात्परम्परया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं, तदवच्छिन्नवत्त्वस्य च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति, यत् यद्रूपावच्छिन्नं तादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं वक्तव्यं शब्दैक्यस्यानुपादेयत्वात् । अन्येत्यादिमूलम् । यद्यप्युक्तरीत्या सर्व्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्य्यन्तानुधावनस्यावश्यकत्वेनाकिञ्चित्करमेव तादृशाभावप्रतियोगित्वं, तथापि विशिष्टसामाना-

---

वत्त्वस्यानवच्छेदकत्वात् किन्तु तत्संयोगवत्त्वादेरित्यत आह, यदिति । यदनवच्छेदकमिति, एकव्यक्तिसाध्यस्थले यद्रूपावच्छिन्नसाध्यमनवच्छेदकमिति । वह्न्यादिसाध्यकस्थले यादृशरूपावच्छिन्नमिति च वह्निसंयोगादिसाध्यके यं यथाक्रमसुक्तन्निके । ननु वह्नित्वावच्छिन्नवह्नित्वेनावच्छेदकत्वात् कथं चरमद्वयमिति चेदत्रापि दण्डादिसाध्यकप्रकारस्यानुसरणीयत्वात् । विशेषलक्षणा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धिकरण्यरूपाया व्याप्तेर्व्यधिकरणासम्भवित्वमात्रे तात्पर्य्यं, व्याप्तिरेवेत्यस्य कालिकीत्यादि ॥ ८ ॥

अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिं निरस्यति, न चेति। अभेदस्येति। तथाच मूले महीरुहो विहङ्गमसंयोगी नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवद्विशेषणाभावविषयतामात्रं कल्प्यते बाधकवलात् यत्र च विशिष्टभेदे न वाधकं तत्र तथाप्रतीतिबलात्तत्सिद्धिरप्रत्यूहैवेति नातिप्रसङ्गः।

अत्र वदन्ति। अभेदस्य भेदाभावस्य ज्ञानं न बाधकं भेदवत्तत् प्रतियोगितावच्छेदकस्य संयोगात्मन-

---

भिप्रायेण मूलं योजयन्नाह, तथापीति। तथाच मूले प्रतियोगित्वादित्यन्तं तादृशव्याप्तेर्व्यधिकरणासम्भवित्वे हेतुरिति भावः। दैशिकव्याप्तौ युगपदुत्पन्नत्वादिकं व्यर्थमत आदिभागं पूरयति कालिकीति ॥ ८ ॥

लक्षणस्येति। सामान्यत एकवचनम्। शिखीति। शिखाविनष्टा पुरुषो न नष्ट इत्यादिन्यायात् विशिष्टस्य नाशप्रतियोगित्वेऽपि तत्प्रतीतेः, यथाविशेषणाभावावलम्बनत्वं, तथोक्तबाधात् प्रकृतेऽपीत्यर्थः। नन्वेवं गुणादावपि संयोगिभेदो न सिद्धेरत अत आह, यत्र चेति। तत्र च वाधिकायाः प्रतीते-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः, यथा हि प्रति-योगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यन्ताभाव-स्याग्रहात्तदत्यन्ताभावाभावव्यवहाराच्च स एव तदभाव इति कल्प्यते, तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्वद-न्योन्याभावस्याग्रहात्तदभावव्यवहाराच्च स एव तस्या-भाव इति निश्चीयते, आधिक्येऽपि चाव्याप्यवृत्तित्वात्, अतएव न मूलावच्छेदेन कपिसंयोगिभेदाभावज्ञानं तथा असम्भवादसिद्धेश्च नापि कपिसंयोगिभेदस्य वृत्त्या-वृत्तित्वज्ञानमसिद्धेः तद्वृत्तित्वस्यैव ग्रहात् नापि कपि-संयोगिभिन्नभेदज्ञानं कपिसंयोगिभेदवत्तद्भेदस्याप्य-

---

रभावादित्यर्थः । तदुपपत्तेरिति । भेदाभेदयोरेकत्र वृत्तेर्न विरोध इति भावः । ननु यदि प्रतियोगितावच्छेदकस्य भेदाभावा-त्मकत्वं, तदेतत् स्यादिति तदुपपादयति, यथा हीति । ननु प्रतियोगिज्ञानेऽभावाग्रहात् प्रतिबन्धत्वमाया तु तदभावा-त्मकत्वम् इत्यत आह, अभावव्यवहारेति । नन्वभावप्रतीतिः प्रमात्वा-नुरोधादतिरिक्त एव सेत्स्यतीत्यत आह, आधिक्य इति । अत-एवेति । यत एव तदभावस्य संयोगसमनैयत्यमित्यर्थः । तथा प्रति-बन्धकं संयोगमभिप्रेत्यासम्भवादिति । अतिरिक्तमभिप्रेत्यासिद्धे-रिति । ज्ञानम्, प्रतिबन्धकमिति शेषः । एवमग्रेऽपि तद्वृत्तित्वस्ये-त्यस्य प्रत्युतेत्यादि । तद्वद्भेदस्येति । तद्वद्भेदः संयोगो वा संयोगसम-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्यवृत्तित्वेनाविरोधात्, नापि मूलावच्छेदेन तज्ज्ञानमसिद्धेः तद्धर्म्मवन्निष्ठभेदस्य तद्धर्म्ममात्रपर्य्यवसिततया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वविरोधाच्च ॥ ९ ॥

न हि घटभिन्नभेदो घटत्वादतिरिच्यते आवश्यकक्लृप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात् अन्यथा सर्व्वत्राभावस्याभावोऽतिरिक्त एव कल्प्येत, अतएवात्यन्ताभाव-प्रतियोगिनोरन्यान्याभावप्रतियोगितावच्छेदकयोः सामान्यत एव क्लृप्तो विरोधः, तत्र कपिसंयोगवत्यपि वृक्षे मूले न कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या तावदाद्ययोः स सङ्कोच्यतां न ह्येषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्या, नियमतः संयोगवत्त्वेन प्रतियोगिनोऽनुप-

---

नियताभावो वेत्यन्यदेतत्। असिद्धौ विवादादाह, तद्धर्म्मेति। इदञ्च प्राचीनमतमभिप्रेत्य, स्वमते तु तद्भेदः संयोगसमनियत इति न कश्चिद्विशेषः अतएवेति विरोध इत्यर्थः ॥ ९ ॥

ननु भेदेनैवात्यन्ताभावः कथं नान्यथा सिद्ध्यत इत्यत आह, न हीति। कदाचिन्न संयोगवति वृक्षे मूले न संयोग इति प्रतीतिसत्त्वादाह, नियमत इति। प्रतियोगीति। यत्रापि संयोगवति वृक्ष इत्यादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थितेः प्रतियोगिकोटौ तदनुल्लेखाच्च मूले न कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इतिवद्वासमानविशेषणस्याभावमात्र--विषयत्वेनोपपन्नत्वान्नान्तिमयोरपीति परास्तम्। अन्योन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तरसमानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधिकरण्यपर्य्यवसायिनो विरोधस्य सत्त्वघटितत्वेन विशेषत एव विश्रामात्, अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिविरुद्धतया तथाविधविरोधकल्पनाया अनवकाशाच्च। किञ्च

प्रतीतिस्तत्रापि संयोगवती वृक्षस्यानुयोगितायामिवोल्लेखो न प्रतियोगितायामित्यर्थः। अत्यन्ताभावेनान्योन्याभावमन्यथासिद्धयन्नाह, मूल इति। अत्र च प्रतियोगिकोटाविव संयोगिनः प्रवेशे संयोगस्यापि तथात्वमिति हृदयम्। शिखी विनष्ट इतिप्रतीतिवदिति। विशेषणप्रतियोगिकत्वांशमात्रे दृष्टान्तः। अभावविषयतामात्रमिति। भेदत्वेन भानेऽपि विशेषणात्यन्ताभावेन निर्वाहार्थं मात्रपदमिति। अन्तिमयोः अन्योन्याभावप्रतियोगितावच्छेदकयोरपीति। प्रश्नोच्यतामित्यनुषज्यते। ननु विशिष्यैव कथं न विरोधः, सामानाधिकरण्यानुभवत्वमेवासिद्धम्। किञ्च भेदस्य शाखाद्यवच्छिन्नवृत्त्यावृत्तित्वकल्पनमपेक्ष्य लाघवेन वृत्त्यावृत्तित्वमेव कल्प्यत इत्यत आह,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिन्या विशेष्ये तद्बाधादास्तां विशेषणध्वंसविषयता, न संयोगीति प्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः, न खलु सहस्रेणापि बाधकैरिदं रजतमिति प्रतीतेरङ्गत्वावलम्बनं व्यवस्थापयितुं शक्यते, न च विशेषणभेद एव तस्या विषयः अग्रेऽपि न कपिसंयोगीति प्रतीत्यापत्तेः युज्यते चान्योन्याभावोऽव्याप्यवृत्तिः कथमन्यथा पक्वतादशायां घटादावयं न श्यामो दण्डादिविनाशसमये चैत्रादौ नायं तद्दण्डवानित्यादयो व्यवहाराः, न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते अनुयोगिनि सप्तमीं विना तदनुपपत्तेः, न खलु भूतलं न घट इत्यादीनि

किञ्चेति। तथाविशेषणात्यन्ताभावेन नान्यथासिद्धिरिति अनुभवबलादेव गौरवमप्यास्थीयत इति भावः। न खल्वित्यादि। तत्प्रकारकत्वस्यानुव्यवसायेन विषयीकरणादिति भावः। ननु प्रत्यक्षप्रतीतौ अत्यन्ताभावस्यापि विषयस्य सत्त्वात् तदनवगाहनं केन निरटङ्कि इत्यतः प्रतिनियतविषयकत्वं शब्दमप्युपष्टम्भकमाह, युज्यते चेति। अयमिति। इदानीमिति शेषः। एवमग्रेऽपि इदञ्च पिठरपाकमभिप्रेत्य। अत्रापि पीलुपाकमादाय विवादादाह, दण्डादीति संसर्गाभाव इति। तेन दण्डध्वंसोऽपि संगृहीतो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाक्यानि कदाचिदपि घटसंसर्गाभावं बोधयन्ति तथात्वे वा घटो न घट इत्यादेरपि प्रसङ्गात् ॥ १० ॥

अपि च विशिष्टवाचकदण्डादिपदेभ्यो धर्म्मुपसर्ज्जनतयोपस्थितस्य दण्डादेः कथं प्रतियोगित्वेनाभावेऽन्वयः इतरविशेषणत्वेनोपस्थितस्य निराकाङ्क्षतयान्यत्र विशेषणत्वेनान्वयायोगात् । न चात्र विशिष्टोपस्थापकं पदं विशेषणमात्रपरं, तथापि चैत्रो न दण्डो घटो न श्यामं रूपमित्यादावपि दण्डादिसंसर्गाभावप्रतीत्यापत्तेर्दुर्व्वारत्वात्, एतेन नञोऽभाववल्लाक्षणिकतया विनैव सप्तमीमन्वयबोधसमर्थनं प्रत्युक्तम्, एवञ्च चैत्रो

भवतीति प्रकृतमेव व्यतिरेकेण व्यवस्थापयितुमाह, न खल्विति । इष्टापत्तावनिष्टमाह, तथात्वेति ॥ १० ॥

ननु यत्र विशेषणतावच्छेदकप्रकारेणैव विशेषणं भासते तत्रैवानुयोगिनि सप्तमीं विनापि विशेषणाभावोऽवगम्यत इह तु घटस्य विशेष्यतया न तदित्यत आह, अपि चेति । तथापीति । विशिष्टपदस्य विशेषणपरतया तथा समर्थने शुद्धविशेषणोपस्थापकस्य सुतरामेव तथात्वापत्तेरित्यनुयोगिनि सप्तम्या अभावाश्रयत्वलाभायैवादर इति मन्वानो नञ्पदेऽभाववत्येव लक्षणया तल्लाभ इति यो ब्रवीति तन्मतं दूषयति, एतेनेति । चैत्रो न दण्ड इत्याद्यापादनेनेत्यर्थः । ननु सर्व्वत्रैव संसर्गाभावबोधने यद्यनुयोगिनि सप्तम्यपेक्षा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न पचतीत्यादौ आख्याताच्छक्त्या लक्षणया वोपस्थितस्य कर्त्तुरेव भेदो भासत इत्यस्तु, वस्तुतो न पचति चैत्रो नेदं मैत्रस्येत्यादौ विभक्त्यर्थस्य कृतिसम्बन्धादेरभावान्वयबोधे नञा सप्तमी नापेक्ष्यते, अपेक्ष्यते च प्रातिपदिकार्थस्येति निपुणतरमुपपादयिष्यामः। नञो वैधर्म्म्यपरतया न श्याम इत्यादेः श्यामादिविधर्म्मेत्यर्थः, वैधर्म्म्यञ्च रक्तत्वादिकमेव यदाहुराचार्य्याः, श्यामाद्रक्तोविधर्म्मा न तु पृथगित्यपि वदन्तीति कृतं पल्लवितेन॥ ११॥

सम्बन्धत्वेनेति। निरूपितत्वमेतत्। कस्येति। इत्यस्याननुगताया अपि व्याप्तेर्ज्ञानं यथानुमितिहेतुस्तथा

तदा न पचतीत्यत्र कथं पाककृत्यभावबोध इत्यतस्तद्बोधयति, एवं चेति, शक्त्येति। वैयाकरणमते लक्षणादिकल्पनादाह, वस्तुत इति। सम्बन्धादेः नेदं मैत्रस्येत्यादौ, निपुणतरमिति। नञ्व्यतिरेकेण प्रतियोग्यन्वये यत्रानुयोगिनि सप्तम्यपेक्षा तत्रैव नञा सापेक्षते नान्यत्रेत्यादेः प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमावित्यनेन नञ्वादे प्रतिपादितत्वादिति। ननु वैधर्म्म्यं तदवृत्तिधर्म्म इत्यत आह, वैधर्म्म्यञ्चेति। अपीत्यस्वरसोद्भावनं तद्बीजं तु नञा तदकालीनत्वप्रकारेणोपस्थितौ लक्षणेति॥ ११॥

निरूपितत्वमिति। संयोगत्वादिनैव तत्प्रवेश इति भावः। अतएव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ धूमवति वह्निरूपौ न स्तः धूमवान् वह्नि-मद्भेदौ न भवतीतिप्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इति चेन्न, तादृशाभावानभ्युप-गमात् अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्नि-वह्निमन्तौ।

वक्ष्यते। एते अन्योन्याभावात्यन्ताभावगर्भे। तादृ-शेति। ननु किं द्वित्वादिकं प्रतियोगितावच्छेदकमेव न भवति किं वा भवत्येव, परन्तु क्लृप्तानामेव स्वसमाना-धिकरण-तत्तद्धर्म्मावच्छिन्न-प्रतियोगिताकानामभावानां लाघवादित्यभिप्रायः, नाद्यः एकैकाभावप्रतीतितो द्वौ न स्त इति प्रतीतेर्व्विलक्षणत्वात्, शब्दादिना द्वौ न स्त

इत्यमिति। वक्ष्यत इति। विभिन्नेष्वेव कार्य्यकारणभावौ न सामा-न्यत इति। चतुर्णामेव लक्षणानामाक्षेपात् मूलस्य द्विवचनं न घटत इति तदुपपादयति, एते इति। तथाच तत्तदभावगर्भत्वेन द्वयोरैक्यमिति भावः। अभ्युपगमे वेत्यस्याक्षेपमारभते, नन्वित्या-दिना। नन्वेकाभावप्रतीतिसाधारण्येऽपि द्वित्वस्याधिकस्य भाना-देव वैलक्षण्यमित्यत आह, शब्दादिनेति। प्रत्यक्षे तु तादृशनिश्चय-काले तथा संशयोऽसिद्ध इति हृदयम्। ननु शब्देन घटत्वादेरव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति निश्चयेऽप्येकैकाभावसंशयाच्च, विषयानुगमं विना अनुगताकारप्रत्ययायोगात्। न चाभावस्य द्वित्वाधिकरणप्रतियोगिकत्वमात्रं द्वित्वसामानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः, तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययात्, द्वित्वसामानाधिकरण्याभानेऽपि प्रतीतेरनुगताकारत्वाच्च, अत एव न तादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वम् अन्यतरत्वानुल्लेखेऽपि घट पटौ न स्त इत्यनुगतप्रत्ययाच्च, न च परम्परासम्बन्धेन तादृशद्वित्वसामान्याभाव एव द्वौ न स्त इति प्रती-

---

च्छेदकत्वं न विषयीक्रियत एव परन्तु प्रत्यक्षमादायैव तथा वक्ष्याम इत्यत आह, विषयेति। द्वित्वावच्छिन्नप्रतियोगिताद्यनुगताकार इत्यर्थः। ननु द्वित्वाधिकरणप्रतियोगिकत्वमेवानुगतं वाच्यमित्याशङ्क्य निषेधति, न चेति। प्रथमेऽवच्छेदकत्वस्पर्शाभावादाह, द्वित्वेति। तादृशेति। घटपटोभयविशेषविरहिणि घटपटोभयविशेषशालिनि, घटपटौ न स्तः प्रत्ययादित्यर्थः। ननु द्वित्वसमानाधिकरणत्वेन भासमानो यो धर्म्मस्तदवच्छिन्नप्रतियोगिताकत्वमेवानुगमकं वक्तव्यमित्यत आह, द्वित्वेति। अतएवेति। वक्ष्यमाणात्मकम्, अतएवाग्रे चकारविरहः। परम्परेति। द्वित्वाश्रयघटित-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेर्विषयः, द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात् द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ न स्त इत्यादिप्रत्ययाच्च, अतएवैकैकविशिष्टापराभावोऽपि न तदालम्बनं विरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्यय इत्युक्तत्वाच्च नान्त्यः, तथात्वेऽपि साध्यतद्वतोस्तादृशाभावप्रतियोगित्वानपा-

---

परम्परेत्यर्थः। अन्यथोभयवत्यपि उभयवृत्तिद्वित्वस्य साक्षात् सम्बन्धेनाभावात्तादृशप्रतीत्यापत्तिः। द्वित्वाधिकरणयोरिति। द्वित्वं नास्तीत्येवाकारः स्यादिति भावः। ननु प्रत्यक्षे आश्रयस्य द्वित्ववैशिष्ट्यभाने द्वित्वस्यापि तद्द्वित्वस्यापि तद्वृत्तित्वं भासते, तथाच प्रतियोगिकोटौ द्वित्वाधिकरणस्योल्लेखेऽपि तस्य विशेषणतयैवोपयोग इत्यत आह, द्वित्वादेरिति। प्रत्यक्षे विवादादाह, अन्तत इति। घटपटावित्यंशे द्विवचनार्थस्य प्रकृत्यर्थविशेषणतयैव भानाभ्युपगमादिति भावः। अत्रेदं चिन्त्यं, व्यतिरिक्ताभाववादिमतेऽपि द्वित्वमात्रं न प्रतियोगितावच्छेदकं किन्तु घटवृत्तिद्वित्वं, तथाच तादृशबोधार्थं लक्षणावश्यकीति तुल्यम् अनतिरिक्ताभाववादिमते इति, अतएवेति। पटस्य घटवैशिष्ट्याभानेऽपि तादृशप्रतीतिर्यत एवेत्यर्थः। क्वचिद्वस्तुनोऽपि दुर्घटत्वमाह, विरुद्धयोरिति। इत्युक्तत्वाच्चेति। चकारः पूर्व्वोक्तसमुच्चयपरः। किं चेत्याद्यन्यकल्पमाशङ्क्य निषेधति, नान्त्य इति। तथात्वेऽपीति। क्रदाभावस्यैव द्वित्वावच्छिन्नप्रतियोगिताकत्वे वह्नेरपि प्रतियोगित्व-

5116

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यात्, अन्तरेणाभावान्तरमेकैकघटवति जायमानाया यत्किञ्चिद्घटद्वयवति चानुत्पद्यमानाया घटौ न स्त इति प्रतीतेरुपपादयितुमशक्यत्वादित्यत आह, अभ्युपगमे वेति। उभयत्वमेव प्रतियोगितावच्छेदकं न तु साध्यतावच्छेदकं साध्यवत्त्वं वेत्यर्थः, अश्रूयमाणावच्छेदकत्वांशेऽपि लक्षणे तथैव विवक्षितमिति भावः ॥१२॥

मापतितं, अन्यथा द्वित्वस्य क्लृप्तमात्रवृत्तिप्रतियोगितातिरिक्तवृत्तित्वेनानवच्छेदकत्वभङ्गादिति। अतिरिक्ताभावमेव व्यवस्थापयति, अन्तरेणेति। एकैकेति। योऽन्तेन घटत्वावच्छिन्नसामान्याभावविषयत्वनिरासः, यत्किञ्चित् घटद्वयप्रतियोगिताकाभावनिरासः। ननु घटौ न स्त इत्यत्र द्वित्वावच्छिन्नाभावः सिद्ध्यतु, घटपटौ न स्त इत्यत्र कथं प्रत्येकाभावद्वयस्यैव द्वित्वावच्छिन्नसामान्याभावविषयत्वनिरासः, यत्किञ्चिदिति। तेन यत्किञ्चित् घटद्वयस्यैव द्वित्वावच्छिन्नप्रतियोगिताकत्वकल्पनादिति चेदत्र वदन्ति। सामान्याभावयुक्तिन्यायेनातिरिक्तद्वित्वावच्छिन्नप्रतियोगिताकल्पने विनिगमनाविरहेणातिरिक्ताभावकल्पनमिति। क्लृप्ताभावेन द्वित्वप्रतीतेरन्यथोपपादनेऽपि द्वित्वविशिष्टाभावस्य विशिष्टाभावतयातिरिक्तस्यैव व्यासज्यवृत्तिप्रतियोगिताकाभावत्वमित्यपि कश्चित्। उभयत्वमेवेति। सम्मुग्धमेवाभावद्वयघटितं लक्षणमभिप्रेत्य अतएव तथैव निराकरोति। नत्विति। ननु विशेषलक्षणेऽवच्छेदकाप्रवेशात्तत्र सदोषस्तदवस्थ एवेत्यत आह, अश्रूयमाणेति ॥ १२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथवानौपाधिकत्वं व्याप्तिः, तच्च यावत् स्वसमानाधिकरणात्यन्ताभाव--प्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम् ।

तच्चेति । स्वं साधनत्वाभिमतं तथाच साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका यावन्तो धर्म्मा यद्धर्म्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकाः तद्धर्म्मावलीढ़सामानाधिकरण्यमित्यर्थः, एतेन सर्व्वत्र तादृशैर्यावद्भिरवच्छिन्नस्य तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसञ्जकात्, यावत्त्वाद्यवच्छिन्न–प्रतियोगिताकादतिरिक्तस्याभावस्याप्रसिद्धिः

तथा चेत्यादि । यद्धर्म्मावच्छिन्नेति । यत्साध्यतावच्छेदकावच्छिन्नेत्यर्थः । तेनेदं गुणकर्म्मान्यसत्तावज्जातिमत्त्वादित्यत्र द्रव्यत्वत्वादेर्जातिसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि न क्षतिः । यथाश्रुतमूलानुपपत्तिं व्यञ्जयति, एतेनेति । अवच्छिन्नस्येति । अप्रसिद्धेरित्यनेनान्वितम्, अवच्छेदकस्य यावत्त्वं विहाय यावच्छिन्नेऽपि तद्योगं खण्डयति, तादृशेति । अतिप्रसञ्जकादिति । धूमवत्यपि यावदार्द्रेन्धनाभावसत्त्वादतिव्याप्तेरित्यर्थः । आदिपदेन यावत्तादृशावच्छिन्नगगनवृत्त्युभयत्वपरिग्रहः । अवच्छि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरणस्य प्रायशस्तथा। रूपादिसाध्यकपृथिवीत्वादावव्याप्तिश्च क्वापि रूपादिव्यक्तौ तादृशयावदभावसामानाधिकरण्यासम्भवादिति प्रत्युक्तम्। सर्व्वत्र सोपाधावेकव्यक्तिकस्य सम्भवतोऽप्युपाधेर्द्धर्म्मान्तरविशिष्टत्वादिना अभावो भवत्येव साध्यसमानाधिकरण इत्यवच्छेदकानुसरणम् ॥ १३ ॥

साधनसमानाधिकरणात्यन्ताभावप्रतियोगिताव--

न्नेऽपि यावत्त्वं विहायाभावे यावत्त्वं खण्डयति, तादृशेति। तथा अप्रसिद्धिरित्यर्थः। नानाहेत्वधिकरणकस्थले तादृशानां यावदभावानां चालनीन्यायेन समवस्थितानामधिकरणमप्रसिद्धमिति। एकाधिकरणहेतुस्थले तु तस्मिन्नेवाधिकरणे तादृशा यावन्तो भावा इत्युक्तं, प्रायश इति। अथ यावदभावानां प्रत्येकाधिकरणावृत्तित्वं साध्यस्य वक्तव्यमित्यत आह, रूपादीति। अतएव विशदयति, क्वापीति। इदञ्च घटरूपे यावन्मध्यपतितस्य घटत्वाभावस्य सामानाधिकरण्याभाव इति क्रमेणोन्नेयम्। सर्व्वत्रेत्यादि। आर्द्रेन्धनादीनां चालनीन्यायेन धूमवत्त्वभावसम्भवेऽपि व्यभिचाराधिकरणे भिन्नत्वस्याभावो धूमवतीति प्रघट्टकार्थः। विशिष्टत्वादिनेत्यादिपदेन द्वित्वपरिग्रहः ॥ १३ ॥

तदपि विशिष्टस्यातिरिक्तत्वमतालम्बनानुपयादेव उक्तविव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यद्धर्म्मावच्छिन्न-समानाधिकरणास्तद्धर्म्मावलीढ़--सामानाधिकरण्यमित्यर्थः । अभावश्चात्र भावभिन्नो ग्राह्यस्तेन इदं जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूप-सामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्व-

---

त्तायां मूलाचरासमर्थनादाह, साधनेत्यादि । तथाच मूलेऽभावसामानाधिकरण्यमित्यत्र बहुव्रीहिराश्रयणीयः, एतद्विवक्षायान्तु रूपवान् पृथिवीत्वादित्यत्र यावत्सु अभावेषु रूपत्वावच्छिन्नसामानाधिकरण्यं वर्त्तत एव । भावभिन्न इति । रूपप्रागभावाभावत्वावच्छिन्नाभावस्य यावद्रूपप्रागभावात्मकस्य साध्यसामानाधिकरण्याभावात् स एव दोष इत्यतोऽभावपदं अत्यन्ताभावपरं बोध्यम् । तेनेत्यादि भावभिन्नोऽत्यन्ताभावो ग्राह्यस्तेन प्राचीननये रूपप्रागभावरूपध्वंस रूपयावदभावेषु साध्यसामानाधिकरण्याभावेऽपि नोक्तदोषः । ननु तथापि जलावृत्तित्वाऽवच्छिन्नाभावाऽन्यतराभावत्वावच्छिन्नप्रतियोगिताकयावन्मध्यपतिते तेजोवृत्तित्वावच्छिन्नाभावस्य न जलवृत्तित्वसामानाधिकरण्यमिति पुनरव्याप्तिरिति चेत्, तादृशावच्छिन्न-प्रतियोगिताकाभावत्वव्यापकसाध्यसमानाधिकरणवृत्तित्वकत्वस्य विवक्षितत्वात् । अत्र रूपसामान्याभावस्य स्नेहसमानाधिकरणात्यन्ताभावप्रतियोगित्वं जलपरमाणुमादाय बोध्यं, जलावयविन्युत्पत्तिकाले तत्सत्त्वाभ्युपगमात् । न च तथापि स्नेह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामानाधिकरण्यविरहेऽपि नाव्याप्तिः। घटध्वंसो ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति ॥ १४ ॥

वत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकजलावृत्तित्वावच्छिन्नाभावहेतोरवृत्तित्वावच्छिन्नाभावान्यतरत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगिताकस्य तेजो वृत्तित्वावच्छिन्नाभावस्य जलत्वसामानाधिकरण्यविरहादव्याप्तिरिति वाच्यम्। स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वव्यापकसाध्यतावच्छेदकावच्छिन्न-साध्यसमानाधिकरणवृत्तित्वकत्वस्यानेन विवक्षितत्वात्। एवं चाभावेषु भावभिन्नत्वविवक्षणं यथाश्रुताभिप्रायेणेति बोध्यम्। ननु घटध्वंसो ध्वंसत्वादित्यत्र तादृशाभावस्तद्घटध्वंसत्वाभावा एव, ते च स्वाधिकरणघटात्यन्ताभावादिभ्यो नातिरिच्यन्ते, तेषु घटध्वंसत्वसामानाधिकरण्यसत्त्वादतिव्याप्तिरित्यत आह, घटध्वंस इति। अत्र यद्यपि पटध्वंसस्यापि घटध्वंसत्वाभावरूपतया घटध्वंसत्वासमानाधिकरणतया च नातिव्याप्तिसम्भावना, तथापि घटध्वंसत्वाभावस्याधिकरणस्वरूपत्वे आधाराधेयभावानुपपत्तिरितिभयेन समानाधिकरणाभावैरेव तथा धीरिति ये वर्णयन्ति तेषां मतमवलम्ब्येदमुक्तमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावदिति। स्वं व्यभिचारि येषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः। यावदिति। यत्पदं साध्यत्वाभिमतपरं, सोपाधिवारणाय यावदिति लुप्तसप्तमीकस्य द्वितीयात्यन्ताभावस्य विशे-

---

ध्येयम्। प्राचीननये घटध्वंसत्वस्य घटध्वंसरूपत्वादाह, तत्प्रकार-केति। तत्र यद्यपि विषयत्वं स्वरूपमेव तथापि प्रमास्वरूपमेव तद्बोध्यम्। अतिरिक्त इति। घटध्वंसत्वं नास्तीति धीस्तावदनुगता-कारा तस्याश्च तावत् स्वरूपनियम्यत्वे गौरवमित्यतिरिक्त एवाभावः कल्प्यत इति। न च तत्रापि घटध्वंसत्वं नास्तीति धीसत्त्वादति-रिक्तकल्पनेऽनवस्थाऽनतिरिक्तकल्पने आत्माश्रय इति वाच्यम्। एवम्विधदोषेण घटाभावोऽपि लुप्येत तत्रात्माश्रयोऽन्यथानुपपत्त्यैव बोध्य इति चेदिहापि समानमिति भावः॥ १४॥

यथा श्रुतमूले वह्निमान् धूमादित्यत्र धूमीययावद्व्यभिचारि-मध्यपतितस्य वह्निद्रव्यत्वादेर्व्यभिचारित्वं कदापि न वह्नाविति भयेन व्याचष्टे, स्वमिति। तथाच बहुव्रीह्यन्तस्वव्यभिचारिपदेन समं यावत्पदस्य कर्मधारयो बोध्यः। अनन्तरं च षष्ठीसमास आश्रय-णीयः। लुप्तसप्तमीकस्येत्यादिषष्ठीद्वयं वैयधिकरण्येन, तथाच लुप्त-सप्तमीकस्य पदस्य योऽर्थो द्वितीयात्यन्ताभावः तद्विशेषणमिति। तथाच लुप्तसप्तमीकस्येति ज्ञाप्यज्ञापकभावे षष्ठी, सामानाधिकरण्ये तु अर्थस्य लुप्तसप्तमीकत्वाभावात्, पदस्य च विशेषणत्वाभावादस-ङ्गतिरिति भाव्यम्। केचित्तु वैयाकरणरीत्या पदयोरेव विशेषणवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न ह्येवं सोपाधिः, तत्र साधनसमानाधिकरणा-त्यन्ताभावप्रतियोगिन आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ता-भावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्या-भावात्, उपाधेः साध्यव्यापकत्वात् एतदेव यावत्-स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपा-धिकत्वं गीयते ।

षणम् । तथाच साध्यव्यापकतावच्छेदकावच्छिन्नप्रति-योगिताकात्यन्ताभावत्वव्यापक-स्वसामानाधिकरण्यसा-मान्याभावकत्वमर्थः । केवलान्वयिस्थले त्वाकाशादि-

---

ग्रेष्यभाव इति मतेनेदमित्याहुः । तथाचेत्यादि । यावदित्यस्यैव व्यापकत्वमित्यर्थः । तत्प्रयोजनं तु धूमवान् वह्नेरित्यत्र द्रव्यत्वाभावे वह्निसामानाधिकरण्यसामान्याभावसत्त्वादतिव्याप्तिरिति तद्वारणम् । तत्रैवार्द्रेन्धनाद्यभावे रासभनिष्ठसामानाधिकरण्यस्याभावसत्त्वादति-व्याप्तिरिति सामान्यपदोपादानम् । अत्र व्यापकत्वमध्ये चेत् प्रति-योगिव्यधिकरणपदं निक्षिप्यते, तदा द्वितीयाभावे तदवश्यं देयं, अन्यथा द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ संयोगाभावे तत्सामानाधिकरण्यसत्त्वादव्याप्तिरिति, एतन्निष्कर्षस्य व्याप्तिलक्षण-वद्बोध्यः । उभयत्रैव तद्दानमिति तु सम्यगिव प्रतिभाति ; सम्प्र-दाय इत्यस्वरसोद्भावनं तद्बीजन्तु द्रव्यं पृथिवीत्वादित्यादौ गुणवृत्ति-त्वविशिष्टसत्ताद्यभावस्य द्रव्यत्वव्यापकस्य योऽभावः सत्तारूप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः। केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणताया व्यापकं तत्त्वमर्थः। न च तादृशप्रतियोगितानवच्छेदकवत्त्वमेव यावत्त्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थलाभादेव सामञ्जस्येऽभावद्वयोपादानमनतिप्रयोजनकमिति वाच्यं, यावतां तादृशामिन्धनादीनामैकाधिकरण्यस्याप्रसिद्धेः। न चावच्छेदकांशमपहायाप्रतियोग्येव यावत्त्वेन विशिष्यतां साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः ॥ १५ ॥

स्तस्मिन् हेतुसामानाधिकरण्यसत्त्वादव्याप्तिरिति, इदमेव दोषमुद्धरन्नाह, केचित्त्विति। तादृशाः साध्यव्यापकत्वावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः, प्रत्येकं तच्छून्यत्वं यदधिकरणताया व्यापकत्वं तत्त्वमित्यर्थः। यावत्त्वावच्छिन्नशून्यत्वविवक्षणे धूमवान् वह्नेरित्यत्रातिव्याप्तिस्तत्रापि वह्निमत्ययोगोलके आर्द्रेन्धनाभाववत्यपि द्रव्यत्वाभावाभावेन तादृशशून्यत्वसत्त्वादिति, अनतीति। यावत्त्वस्याभावविशेषणस्य व्यापकासंसर्गादिति यथासन्निवेशि वैयर्थ्याभावादिति भावः। न चेत्यादिपूर्व्वकल्पे यावदाश्रयत्वस्य व्यापकत्वमतोऽप्रसिद्धिः। अत्र तु अप्रतियोगिनां व्यापकत्वे तच्च रूपान्तरेणापि निर्व्वहतीति नाप्रसिद्धिरिति ध्येयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्वा यावद्यत्समानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वं, सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन समं हेतोः सामानाधिकरण्यम् उपाधेः साधनाव्यापकत्वात्। यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः।

साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदके यावति यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वं नास्ति तत्त्वमर्थं इति तु नव्याः। अवच्छिन्नं सामानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपं वा

रूपान्तरेणेति। प्रमेयत्वादेरपि गगनादिवृत्तित्वेन घटवृत्तित्वविशिष्टत्वादिना चाभावस्य सुलभत्वादिति, अत्र च साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकानि यावन्ति यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकानीति तु स्फुटतया पूर्व्वोक्ततया च नोदङ्कितमिति ध्येयम् ॥ १५ ॥

संयोगेन सामानाधिकरण्यमभिप्रेत्याह, धूमत्वेति। समवायेन सामानाधिकरण्यमभिप्रेत्याह, द्रव्यत्वत्वादेरिति। यद्वा पूर्व्वं नानासामानाधिकरण्यस्यावच्छेदकं दर्शितं इदानीन्तु एक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्तिः । इत्थञ्च धूमत्वद्रव्यत्वत्वादेर्व्याप्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्व्ववर्त्तितावच्छेदकधर्म्मात्मककारण-तावच्छेदकत्ववदभेदेऽप्युपहितानुपहितभेदाद्वा समर्थ-नीयं, तत्रायमभिप्रेत्याह । यत्सम्बन्धितेति । सा सम्बन्धिता सामानाधिकरण्यरूपा जनकत्वादिव्यावृत्ता, अत्र च विशिष्टसत्तात्वाद्यवच्छिन्नगुणादिसामानाधि-करण्याधिकरणसत्त्वादेः कर्म्मादौ परामर्शाद्गुणाद्यनु-मित्यापत्तेः ॥ १६ ॥

साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तु

व्यक्तिके एकसामानाधिकरण्येऽप्यवच्छेदकं स्फोरयितुमाह, द्रव्य-त्वत्वेति । दण्डत्वादेरिति । नियतपूर्व्ववर्त्तित्वमात्रस्य कारण-त्वेऽरण्यस्थदण्डस्याकारणत्वप्रसङ्गः । नन्वभेदेऽप्यवच्छेद्यावच्छेदक-भावे दण्डो दण्ड इत्यपि प्रतीतिः स्यादित्यत आह, उपहि-तेति । शुद्धं धूमत्वमवच्छेदकं सामानाधिकरण्यावच्छेदकत्वोप-हितन्त्ववच्छेद्यमिति भावः, तादात्म्यसम्बन्धसंग्रहायाह, जनक-त्वादीति । तथाच तेन व्याप्यव्यापकभावेऽपि न क्षतिरिति भावः । अत्र चेत्यादि व्याप्तिविशिष्टहेतुमत्त्वं पक्षे मृग्यं, व्याप्तिश्च विशिष्ट-सत्तात्वावच्छिन्नसत्तानिष्ठसामानाधिकरण्यं तद्वती च सत्ता-कर्म्मनि वर्त्तते एवेति भावः ॥ १६ ॥

अथ व्याप्त्युपहितव्याप्यवत्त्वमेव तथा वक्तव्यं, व्याप्तिश्च तादृश-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाहि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकं धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकं, धूमासम्बन्धिनि गतत्वात् न ह्यति-प्रसक्तमवच्छेदकं, संयोगादौ तथात्वादर्शनात्, किन्तु वह्नावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृ-शश्च व्याप्यमेव ।

पक्षे साध्यनिर्णयात् प्रागसम्भवीत्यनुशये न द्वितीयम्, अयमालोको धूमो वेत्यादौ विशिष्यसन्देहेऽपि सामा-न्यतोऽवच्छेदकरूपवत्त्वनिर्णयः सम्भवत्येवेति हृदयम् । अत्रावच्छेदकत्वं नान्यूनवृत्तित्वम् अन्यूनानतिरिक्त-वृत्तित्वं वा, वह्न्यादौ साध्ये मेयत्वादावतिप्रसङ्गात् धूमत्वादावप्रसङ्गाच्च, किन्त्वनतिरिक्तवृत्तित्वं तच्च यद्यपि न तदभाववदवृत्तित्वं, गुणवान् सत्त्वादित्यत्र सत्तात्वे-

---

सामानाधिकरण्यरूपेत्यत आह, साध्येति । प्रागिति । तथाच पक्षे साध्यानिर्णयेऽपि यदनुमितिर्मृग्यते तन्न स्यादिति भावः । न तु भिन्नसाधनाभिप्रायेण तद्योजनीयं, भिन्नप्रकारकसाध्यनिर्ण-येऽपि यदनुमानमादायापि तथोपपत्तेरिति । नन्वयमालोको धूमो वेत्यादौ धूमत्वालोकत्वादेरवच्छेदकस्यानिर्णयात् कथं तत्रा-नुमितिः, कथं वा तेनैव मीमांसकमतनिराकरणं इत्यत आह,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽतिप्रसङ्गात्, न च कर्म्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभाववत्यां सत्तायां वर्त्तमानत्वान्न तथा, तथा सति विशिष्टसत्तात्वे प्रागुपदर्शितदिशा च धूमत्वादावव्याप्तिप्रसङ्गात्, तथापि अतिरिक्ते यद्धर्म्मविशि-

---

अयमालोक इति। सामान्यत इति। (१)साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वेन तयोर्निर्णयादित्यर्थः। विशिष्टेति धूमत्वत्वेनालोकत्वत्वेन सन्देहेऽपीत्यर्थः। सामानाधिकरण्यावच्छेदकविशिष्टवान् पर्व्वतोऽयमित्येव परामर्शाभ्युपगमादिति भावः। आद्ये मेयत्वेति उभयत्राह, धूमत्वेति। सार्व्वभौममतमाशङ्क्य निराकुरुते, न चेति। न च तथा न तदभाववदवृत्तित्वम्। अथ तन्मते विशिष्टं तावदतिरिक्तमेवेत्यत आह, प्रागिति। धूमावयवे धूमेन वह्निसामानाधिकरण्यमिति प्रतीतेर्धूमेऽपि तदभावसत्त्वात् धूमत्वस्य तथात्वं व्याहतमित्यर्थः। अतिरिक्त इति। अतिरिक्तत्वावच्छेदेनेत्यर्थः, तेन धूमवान् वह्नेरित्यादौ कस्यचिदतिरिक्तस्य जलत्वादेर्वह्नित्वविशिष्टवह्न्यधिकरणावृत्तित्वेऽपि धूमाभावस्य तथाविधस्य वह्नित्वविशिष्टवदयोगोलकवृत्तित्वान्नातिव्याप्तिः। केवलान्वयिनि तु साध्यसामानाधिकरण्याभाववान् गगनादिरेव (२)बोध्यः, अत्र चावृत्तित्वमित्यत्रापि वृत्तित्वसामान्याभावो बोद्धव्यः, तेन

---

(१) इंलण्ड पुस्तकालयस्य पुस्तके—सामान्यत इत्यादि परामर्शाभ्युपगमादितिभाव इत्यन्त पाठो नास्ति।

(२) इं पुस्तके—इति बोद्धव्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्टहेत्वधिकरणावृत्तित्वं न वर्त्तते, तत्त्वं साध्यासमानाधिकरणावृत्तित्वविशिष्टाधिकरणावृत्तित्वसामान्यकत्वं स्वविशिष्टाधिकरणावृत्ति-यावत्साध्यासमानाधिकरणत्वमिति तु फलितार्थः। सत्तात्वविशिष्टसत्ताधिकरणकर्म्मादिवृत्तित्वस्य साध्यासमानाधिकरणे कर्म्मत्वादौ

रासभादिनिष्ठस्यायोगोलकवृत्तित्वविशिषस्य धूमाभावादावभावेऽपि न क्षतिः। ननु सार्वभौममते सत्ताया अप्यतिरिक्तत्वं गुणावच्छेदेन द्रव्यत्वसामानाधिकरण्याभाववत्त्वात्, तथाच द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यादौ गुणकर्म्मान्यसत्तात्वावच्छिन्नसत्ताधिकरणवृत्तित्वस्य तत्र सत्त्वादव्याप्तिरित्यत आह, साध्यासमानाधिकरणेति। तथाचातिरिक्तत्वं साध्याधिकरणानधिकरणत्वमेव भेदघटितं, तच्च तत्र नास्तीति नाप्रसङ्गः। एतत्सम-न्वयस्तु वह्न्यसमानाधिकरणादिषु(१) न वर्त्तत एव धूमत्वविशिष्टाधिकरणवृत्तित्वसामान्यमिति बोध्यं, (२) अवृत्तिरित्यत्र तादृशवृत्तित्वसामान्याभावो बोध्यः, स्वं लक्ष्यत्वेनाभिमतम्, सामान्यपदप्रयोजनं तूक्तमेव प्राक्। ननु साध्यासमानाधिकरणावृत्तीत्यत्र वृत्तित्वस्याधिकस्य प्रवेशेन गौरवादाह, स्वविशिष्टेति। अन्यत्सर्वं व्याख्यातमेव। द्रव्यं सत्त्वादित्यत्रातिव्याप्तिं खण्डयन्नाह, सत्तात्वेति। विशिष्टसत्त्वे हेतावव्याप्तिं खण्डयन्नाह, कर्म्मा-

(१) इं, पुस्तके—वह्न्यसमानाधिकरणहृदत्वादिषु।
(२) इं, पुस्तके—इति दिशाबोद्धव्यः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वान्नातिप्रसङ्गः कर्म्माद्यन्यत्वविशिष्टसत्ताश्रयश्च न कर्म्मादिरिति नाप्रसङ्गः, एवञ्च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः। यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिस्तद्ग्रहस्तु मेयत्वादिनेति तन्न, व्याप्तिविरहिवृत्तितया गृह्यमाणेन रूपेण व्याप्तिग्रहासम्भवात् अन्यथा अतिप्रसङ्गात्, साध्यतावच्छेदक-

---

द्यन्यत्वेति। एवम् ईदृशावच्छेदकत्वनिर्वचने। मेयत्वादेरिति, इदं वाच्यं मेयत्वादित्यादौ, मेयत्वविशिष्टमेयाधिकरणावृत्त्येव वाच्यत्वासमानाधिकरणं (१) गगनादिकं यावदिति मैथिलमतं दूषयन्नाह, यत्त्विति। तैरुक्तमपि मेयत्वं वैयर्थ्यादेव दूरीकृत्यवृत्तिमत्त्वमात्रमुक्तम्, अन्यथेति व्याप्तिविरहिवृत्तितया गृह्यमाणेनापि व्याप्तिग्रह इत्यर्थः। अतिप्रसङ्गादिति। वह्न्यादौ साध्ये द्रव्यत्वादिनापि व्याप्तिग्रह आपद्यत इत्यर्थः। ननु कथमेतत् द्रव्यत्वस्यातिरिक्तवृत्तितया ग्रहणे व्यभिचारग्रहस्य बाधकस्य सत्त्वात्, मेयत्वे तु न तथेति चेन्न, व्यभिचारास्फूर्त्तावप्यवच्छेद्याभाववद्वृत्तितया गृह्यमाणेनावच्छेदकात्वभावग्रहस्यानुभविकत्वादिति। न चावच्छेद्याभाववद्वृत्तित्वग्रहे व्यभिचारग्रह आवश्यकः, तस्य विभिन्नग्रहसामग्रीकत्वादिति। साध्यतावच्छेदकेत्यादि। साध्यतावच्छेदकसम्बन्धविवक्षणप्रयोजनं तु समवायावच्छिन्नवह्निसाध्यकधूमाति-

---

(१) इं, मेयत्वासमानाधिकरणम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धेन साध्याधिकरणे येन येन सम्बन्धेनावर्त्तमानत्वं, हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणेऽपि तेन तेन तथात्वं बोध्यम् ॥ १७ ॥

नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणतादृशधर्म्मान्तराघटितत्वेन विशेषणीयं सामानाधिकरण्योपादानाद्धूमप्रागभावत्वादिसंग्रहः, तदघटित-

---

व्याप्तिवारणम्। द्रव्य सत्त्वादित्यादौ साध्याधिकरणमध्यपतितमहाकाले सम्बन्धसामान्येनावर्त्तमानं गगनादिकमेव, तच्च हेत्वधिकरणेऽप्यवर्त्तमानमेवेत्यत आह, येनेति(१)। तथाच गुणत्वादिकमादायैव तत्र नातिप्रसङ्गः। वह्निमान् धूमादित्यादौ वह्न्यधिकरणे समवायसम्बन्धेनावर्त्तमानस्य धूमावयवस्य समवायसम्बन्धेन धूमाधिकरणे वर्त्तमानत्वादाह, हेतुतावच्छेदकसम्बन्धेनेति। तथाच तेन सम्बन्धेन धूमवति पर्व्वतादौ समवायेन तस्यावर्त्तमानत्वमेवेति भावः। तथात्वमिति हेत्वधिकरणावृत्तित्वमित्यर्थः ॥ १७ ॥

वारणीयत्वे त्विति। येषां मते पारिभाषिकं व्याप्यतावच्छेदकत्वमक्षुण्णमेव नीलधूमत्वस्य, किन्तु तथा प्रयोक्तुरधिकेनैव निग्रह इति, तन्मते वह्निर्भावस्थलो न बोध्यः (२) स्वसमानाधिकरणेति। तथाच नीलधूमत्वे धूमत्वमेव तादृशो धर्म्मः, धूमेति। धूमत्वस्य प्रागभावावृत्तित्वेन व्यधिकरणत्वाद्विशिष्टाभावस्तत्राक्षुण्ण इति

---

(१) इं, येन तेनेति। (२) इं, वह्निर्भावस्थलो बद्धः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वञ्च तदविषयकप्रतीतिविषयत्वं, स्वरूपसम्बन्धविशेष एवावच्छेदकत्वम्, अतएव न ह्यतिप्रसक्तमवच्छेदकमित्यादिकमपि सङ्गच्छते, अन्यथातिप्रसक्ते अनतिप्रसक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात्, विरुद्धयो-

भावः। ननु नीलधूमत्वस्य कथं धूमत्वघटितत्वं, नीलधूमत्वस्य धूमत्वाजन्यत्वादित्यत आह, तदघटितत्वमिति। तदविषयकेति। प्रतीतिर्लौकिकालौकिकसाधारणी, नीलधूमत्वविषयकं यज्ज्ञानन्तदवश्यं धूमत्वमवगाहते, प्रमेयत्वेनापि तज्ज्ञानस्य धूमत्वविषयकत्वात्, धूमत्वादन्यस्य नीलधूमत्वस्याभावात्। न च धूमत्वेप्यवच्छेदकत्वव्याकोपः, धूमत्वस्यापि धूमत्वाविषयकप्रतीत्यविषयत्वेन तद्घटितत्वादिति (१) वाच्यम्, अन्तरपदेनैव तद्वारणात् तस्य च स्वभिन्नार्थकत्वात्। भिन्नमतमुद्घाटयति, स्वरूपसम्बन्धेति। अतएवेति। यतएवानतिप्रसक्तत्वमवच्छेदकत्वं परित्यक्तमित्यर्थः। अन्यथा तदपरित्यागे, अयोगादिति तदभाववति तद्वत्वभ्रमस्यात्यन्तमसम्भावितत्वादिति, भ्रमखण्डनार्थमेव शब्दप्रयोगस्य सार्थकत्वादिति,(२) गुणवत्त्वादित्यत्र सत्तात्वस्यावच्छेदकत्वाभावं दर्शयितुमाह, विरुद्धयोरित्यादि। तथाच विरुद्धयोः साध्यसाध्याभावयोः अधिकरणे एकसम्बन्धेन यद्विशिष्टो वर्त्तते स च

(१) इं, तदघटितत्वाभावादिति।

(२) इं, गुणवत्सत्वात् इत्यतः सामानाधिकरण्यावच्छेदक इत्यर्थः एतावत्पर्यन्तं नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्भावाभावायोरधिकरणे एकस्यैकेन सम्बन्धेन वृत्ति-र्विरुध्यते, अतस्तत्रावच्छेदकभेदापेक्षा, अतएव व्यभिचारिणि साध्यवदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्य्याः। सत्तात्वन्तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकं विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तद-भावस्य संयोगेन च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्। वह्निमति च संयोगेन वर्त्तमानस्य धूमादेर्वह्न्यभाववति स्वाव-

---

धर्म्मो नोभयोरेकस्यापि सामानाधिकरण्यावच्छेदक इत्यर्थः। एकस्येति एकधर्म्मावच्छिन्नस्येत्यर्थः, तेन धूमवान् वह्नेरित्यत्र वह्नेर्नानात्वेऽपि न क्षतिः। प्रत्यवयवव्यावृत्तिस्त्वग्रे स्वयमेव स्फुटीकरिष्यति। अवच्छेदकस्यावश्यकत्वे परमेषामनुमितिं दर्शयति, अतएवेति। विरोधादिति। तथाच विनिगमनाविरहेण न कस्याप्यवच्छेदकत्वमिति भावः। विरुद्धयोरित्यस्य फलमाह, अव्याप्यवृत्तेरिति। ननु संयोगसंयोगाभावयोरवच्छेदकं शाखादिरूपं भिद्यत एवेति विभिन्नावच्छेदकौ तौ दर्शयित्वाऽविरुद्धावच्छेदकौ तौ दर्शयति संयोगेन चेति, अनयोस्त्वेकावच्छेदेनापि वृत्ति-र्ध्येया। एकेन सम्बन्धेनेत्यस्य फलमाह, वह्निमतीति। ननु तद्धर्म्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यवे संयोगेनावर्त्तमानत्वाच्च तद्वृत्तत्वत्वधूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोधः । व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव तद्धर्म्मविशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहे तदवच्छेदेन साध्याधिकरणवृत्तित्वग्रहायोगात्, अस्तु वा एतन्मते हेतुवृत्तिधर्म्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः तद्धीरेव साक्षाद्विरोधिनी व्यभिचारान्तरधीस्तु परम्परयेति नीलधूमत्वादिकन्तु गौरवान्नावच्छेदकम्, एवञ्च लघुघटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः । न तु तत्सहचरितकम्बुग्रीवादिमत्त्वादिकं, तेन च गुरुणापि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वानुयोगः प्रकारान्तरव्याप्तिवादिनामपि समानः । एवं द्रव्यं रूपात् रसादित्यादौ

विशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहेऽपि तदवच्छेदेन साध्याधिकरणवृत्तित्वग्रहो न दुर्घटः ग्राह्याभावास्पर्शादित्यत आह, अस्तु वेति । परम्परयेतीति । एतदुन्नायकत्वेनेत्यर्थः । व्याप्त्यन्तरवादिनां साम्यमुद्घाटयति एवञ्चेत्यादिना, व्याप्तिग्रहे इति स्वार्थपरार्थाभिप्रायेण परार्थस्थलेत्वाह, कथायामिति । प्रकारान्तरं हेतुसामानाधिकरणेत्यादिरूपम्, अत्र मते दूषणमुद्घाटयितुं तुल्ययुक्त्या लाघवेनान्यत्राप्यवच्छेदकं निर्द्धारयति, एवमिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सकलगुणासाधारणस्य गुणत्वस्य द्रव्यत्वादिसाधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावच्छेदकत्वसम्भवे बहूनां रूपत्वादीनां न तत्त्वं विरुद्धधर्म्मद्वयाधिकरणयोश्च एकस्यैकेन सम्बन्धेन वृत्तौ कथं विरोधः, कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्टरूपादेः प्रयोगः, तथा परामर्शाद्वानुमितिरिति विभावनीयम् ॥ १८ ॥

सर्व्वसाधारण्यायगुणत्वमपेक्ष्याह, द्रव्यत्वादीति। गुणासमवेतत्व इति। एतेन सत्ताव्यावृत्तिः विशेष्यदलेन कर्म्मत्वादिव्यावृत्तिः। न चात्र रूपासमवेतत्वादिभ्योऽपि सत्तावारणे विनिगमनाविरहात्तावतां गुणानां (१) नीलाद्यनुधावनेन च नानात्वावधारणे बहूनामपि हेतुत्वमापतितं, तथाच तदपेक्षा रूपत्वादिकमेव सम्यक्, गुणत्वस्य सामान्यत्वेप्यऽखण्डतया तुल्यत्वादिति वाच्यं, परम्परावच्छेदकत्वकल्पने विनिगमकतया सर्व्वसाधारणस्य गुणासमवेतत्वस्यैव सम्यक्त्वात्। अतएव तुल्यमपि काश्रयत्वादिकमपहाय शब्दाश्रयत्वमेवाकाशपदशक्यतावच्छेदकं स्वयमेव गुणटिप्पन्यां व्यवस्थापितम्। यद्वात्र वाकारोऽनास्थायां सर्व्वसाधारणं गुणत्वमेव पूर्व्वोक्तं सम्यगिति एतन्मतं दूषयति, विरुद्धधर्म्मद्वयेति। तादृशव्याप्तेरप्रयोजकत्वादित्यर्थः। (२) तथाच द्रव्यं सत्त्वादित्यत्र

---

(१) ड़ं, नीलाद्यनुधावनेन च नानात्वावधारणे एतत् पाठो नास्ति।

(२) ड़ं, तथाचेत्यादि स्यादिति भाव इत्यन्तः पाठो नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपरे तु यद्धर्म्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणताया अवच्छेदकं सधर्म्मो व्याप्तिः, ग्रन्थस्तु धूमस्य धूमवतः, धूमत्वं धूमवत्त्वं, वह्नेस्तु वह्निमतस्त्वित्यादिप्रकारेण व्याख्येयः । अत्र चावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, विरुद्धदिक्कालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेश्चाधिकरणतायां तदसम्भवात्तुल्यवृत्तिकधर्म्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद-

---

सत्तात्वमवच्छेदकं स्यादिति भावः । पूर्व्वोक्तमेवोद्घाटयति, कथं चेति । स्वार्थसाधारण्यायाह, तथेति ॥ १८ ॥

मिश्रोक्तं वस्तुतस्तु कल्पमुद्घाटयति, अपरे त्वित्यादि । गुणकर्म्मान्यत्वविशिष्टसत्तात्वसंग्रहाय, यद्धर्म्मेति । विरुद्धेत्यादि । विरुद्धत्वं देशे काले चान्वितं, तथाच विरुद्धदिगवस्थितयोर्विरुद्धकालावच्छिन्नयोः प्रतियोगितद्ध्वंसयोश्च सामानाधिकरण्येन व्याप्तौ नैकाधिकरणत्वमपराधिकरणतावच्छेदकं, तदनवच्छेदकेऽपि तद्वत्त्वप्रसङ्गात् । एवं वह्निमान् धूमादित्यत्र धूमाधिकरणं वह्न्यधिकरणापेक्षया न्यूनं नित्यनिरूपितजन्यनिष्ठव्याप्तौ जन्यकालोऽपि न्यूनो बोध्यः । तुल्येति । एतद्रूपवान् तद्रसादित्यादौ परस्परावच्छेद्यावच्छेदकभावेऽन्योन्याश्रयः, तथाच कुतः स्वरूपसम्बन्धरूपावच्छेदकत्वकल्पनास्त्विति (१) भावः । अत्र

---

(१) ख, अवच्छेदकत्वकल्पनेति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कभावस्य च नियन्तुमशक्यत्वान्नाप्यन्यूनवृत्तिकत्वं न्यून-वृत्तिकधूमादेरव्याप्यतापत्तेः। किन्त्वनतिरिक्तवृत्तित्वं स्वान्यूनवृत्तितत्कत्वमिति यावत्, अतो न केवलान्वयिन्यव्याप्तिः, अत्र च यदन्यूनवृत्तिसाध्यं तत्त्वं स्वव्यापकसाध्यसम्बन्धित्वपर्य्यवसन्नमपेत्य गौरवं परमवशिष्यते तच्च ग्रन्थकार एवाग्रे विवेचयिष्यत इत्याहुः।

वदन्ति, अयमन्योन्याश्रय उत्पत्तौ ज्ञप्तौ वा नाद्यः तयोरजन्यत्वात् * नान्त्यः, एकतरग्रहाभावेऽपि सामान्यतोऽन्यतरग्रहेऽवच्छेद्यावच्छेदकभावपरिच्छेदेऽविरोधात्। ज्ञाने तथात्वेऽपि वस्तुस्थितावविरोधाच्चेति। वस्तुस्थिताविव ईदृशान्योन्याश्रयो दूषणावहस्तान्त्रिकैरङ्गीक्रियते इत्यपरे समादधुः। स्वान्यूनेति। स्वं हेत्वधिकरणता, (१) तत्साध्याधिकरणताव्याप्तहेतुवृत्तित्वाय-बहुव्रीह्यनुधावनम्। अत इति। (२) एतादृशविवक्षणादित्यर्थः। विवेचयिष्यत इति। ग्रन्थकारो लाघवादन्योन्याभावगर्भैवेत्यादाविन्त्यर्थः। (३) ननु साधननिष्ठस्य साध्यसामानाधिकरण्यस्यावच्छेद-

---

* समकालीनयो रूपरसयोः परस्परं स्वजन्यजन्यत्वरूपापादकेन स्वस्य स्व पूर्व्ववर्त्तिपूर्व्ववर्त्तित्वापादनरूपो य उत्पत्तावन्योन्याश्रयः अवच्छेद्यावच्छेदकभावकल्पने तादृशस्य अभावादिति भावः।

(१) इं, तत्साध्याधिकरणता इति नास्ति।

(२) इं, एतादृशविवक्षणादित्यर्थ इत्यादि ग्रन्थकारः इत्यन्तं नास्ति।

(३) इं, अन्योन्याभावगर्भैवेत्यादावित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यं, वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते, सोपाधौ तूपाधिना । अतएव साधनतावच्छेदकभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते, स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति ॥ १९ ॥

उपाधिनेति। विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेति यावत्, वह्नावार्द्रेन्धनप्रभववह्नित्वेन रासभार्द्रेन्धनादौ च तथाविधवह्निविशिष्टत्वेन धूमसम्बन्धेऽवच्छिद्यमाने तथाविधवह्नेरप्यनुप्रवेशात् रासभत्वादिकन्तु निविशते न वेत्यन्यदेतत् । अत्र चेदं स्नेहवत् निःस्नेहं वा

कत्वमुपाधेर्व्यधिकरणत्वादसम्भवीत्यत आह, विशेषणेति । तथाच विशेषणतया तस्य तदुपपत्तिरिति भावः । ननु रासभादौ तथाविधवह्निसमानाधिकरणत्वमवच्छेदकं, तत्र च उपाधिस्तथाविधवह्नेः साक्षाद्विशेषणत्वमनुपपन्नमित्यत आह, उपाधीति । अनुप्रवेशे वैलक्षण्यमाविष्कर्तुमाह, वह्नावित्यादि । आर्द्रेन्धनप्रभववह्नित्वे आधारतयाऽनुप्रवेशः, इतरयोस्तु सामानाधिकरण्येनेति आर्द्रेन्धने च कदाचिज्जनकत्वेनाप्यनुप्रवेशो घटत इति तस्य पृथगुक्तिः । ननु तद्विशिष्टरासभत्वेन सम्बन्धेऽवच्छिद्यमाने रासभत्वस्य वैय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशेषणीभूय वा शीतान्यस्पर्शत्वेन चोपाधिना स्वत एव स्पर्शे साध्यसम्बन्धोऽवच्छिद्यत इत्युपाधिनैवेति नियमे न तात्पर्य्यं परन्तु शुद्धस्य साधनतावच्छेदकस्यानवच्छेदकतामात्रे यत एव

र्थ्यादाह, रासभत्वादिकमिति। अन्यदेतदिति। तथाप्यनुप्रवेशेऽपि न हानिरिति भावः। अत्र चेति। न तात्पर्य्यमित्यनेनान्वयिसाध्यासामानाधिकरण्येन साधनव्यापकतया चानुपाधित्वावतारणाय उदाहरणद्वयं, साध्यासमानाधिकरणतयेत्याद्ये, साधनव्यापकतयेत्यन्त्ये, एतद्वयं स्वयमनुपाधिरित्यत्र (१) हेतुः, केवलेनेति। शीतत्वेन विशेषणीभूय वेति, शीतान्यत्वेन (शीतान्यत्वस्य स्पर्शत्वे विशेषणत्वादिति भावः,) शीतान्यस्पर्शत्वेन चेति चकारस्त्वर्थः। स्वत एवेत्येवकारेण विशेषणत्वं व्यवच्छिन्नं, यद्यप्यस्योपाधेर्न शुद्धसाध्यव्यापकता स्नेहाभावस्य साध्यस्य (२) गुणावृत्तित्वात्तथापि पृथिवीस्पर्शजलान्यतरत्वावच्छिन्नसाध्यस्य व्यापकता बोध्या। ननु अत्र प्रथमे तथास्पर्शनिष्ठसम्बन्धितायां शीतत्वमवच्छेदकं तथा जलत्वविशिष्टस्पर्शत्वमप्यस्तु, जलत्वस्य च उपाधित्वमुपपन्नमेव, द्वितीये च शीतान्यस्पर्शत्वेनावच्छिद्यमाने

---

(१) इं, स्वयमनुपाधिनेत्यत्र। (२) इं, द्रव्यादिवृत्तित्वादिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतएव चतुष्टयः ।

अतएव च साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवं, व्यभिचारिणि-

---

सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकम्, अतएव तद्विशेषस्तत्रोपाधिरिति वदन्तीत्याह ॥ १९ ॥

अतएवेत्यादि। अत्रावच्छेदकत्वं सामानाधिकरण्येन तत्त्वस्यान्यूनवृत्तित्वं व्यापकत्वमिति यावत्, तच्चाधि-

---

आर्द्रेन्धनप्रभववह्निवत्तत्र शीतान्यस्पर्शोऽप्यनुप्रविष्टः, स चोपाधिरेव, तृतीये तु उपाधिनैवावच्छिद्यत इत्यत्र न कापि क्षतिरिति चेन्नैवम्, उपाधिनैवावच्छिद्यत इति नियमेऽनुप्रविष्टोपाधित्वस्य यद्यवच्छेदकत्वव्यापकत्वं, तदा प्रथमे व्यभिचारो बोध्यः। अथानुप्रविष्टावच्छेदकत्वं व्याप्यं, उपाधित्वं व्यापकं, तत्र द्वितीये व्यभिचारो बोध्यः। अथावच्छेदकोपाधित्वं व्याप्यं, अनुप्रविष्टं व्यापकं, तत्र तृतीयमिति यावत्। तद्विशेषः साधनतावच्छेदकातिरिक्तसाध्यसम्बन्धितावच्छेदकविशेषः, तेन शीतत्वादिव्यावृत्तिः ॥ १९ ॥

ननु साधननिष्ठसाध्यसम्बन्धिताया व्यधिकरणस्योपाधेः (१) कथमवच्छेदकत्वमित्यत आह, सामानाधिकरण्येनेति। तथाच यत्सामानाधिकरण्यमवच्छेदकमित्यर्थः। यद्वा सामानाधिकर-

---

(१) ঘ, अनुप्रविष्टोपाधेः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधने एकत्र साध्यतदभावयोर्विरोधिनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धिताव-च्छेदकमस्ति, तदेव च साधनावच्छिन्नसाध्यव्यापकं

करणान्तर्भावेन तेन साध्यविशिष्टसाधनतावच्छेदकाव-च्छिन्नसाधनवत्त्वव्यापकाधिकरणताकत्वं पर्य्यवस्यति, निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः। इत्यत्र सत्ताद्येकव्यक्तिकहेतुनिष्ठद्रव्यत्वादिसामानाधि-करण्यव्यापक-सामानाधिकरण्यप्रतियोगिनि-घटत्वादौ

ण्येनेति, न तु शाखादिवद्वैयधिकरण्येनेति भावः। तत्त्वमवच्छे-दकमित्यर्थः। ननु सम्बन्धितोपाध्योर्वैयधिकरण्यात् कथमवच्छेद्या-वच्छेदकभाव इत्यत आह, तच्चेति। तथाच सम्बन्धितायदधि-करणान्तर्भावेन उपाधिस्तदधिकरणान्तर्भावेन तद्वयोरेव व्याप्तिः। इदमेव दर्शयति, तेनेत्यादिना। अथवा तथापि द्रव्यं सत्त्वादि-त्यत्र घटत्वादावतिव्याप्तिः, घटत्वसामानाधिकरण्येऽपि तादृश-सामानाधिकरण्यव्यापकत्वादित्यत आह, तच्चेति। तथाच साध्यसम्बन्धिताधिकरणं यद्विशिष्टसाधनं तद्वत्त्वमवच्छेद्यमित्यर्थः। साधनवत्त्वव्यापकाधिकरणताकत्वमित्यधिकरणद्वयप्रवेशे गौरवा-दाह, निरुक्तेति। साधनतावच्छेदकावच्छिन्नसाध्यविशिष्टसाधन-व्यापकमित्यर्थः। इत्यच्चेति। अधिकरणान्तर्भावेन व्यापकत्वं इत्यर्थः। द्वितीयव्याख्यायामेतस्य स्वातन्त्र्येण निरासो बोध्यः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधनाव्यापकं तत्रोपाधिः, अतएव व्यभिचारे चावश्यमुपाधिरिति सङ्गच्छते, अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारित्वेन न तदनुमानमप्रयोजकत्वात् ॥ २० ॥

नातिप्रसङ्गः, न वा द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ द्रव्यत्वविशिष्टसत्ताद्यव्यापके स्पर्शवत्त्वादावप्रसङ्गः, निःस्नेहं स्पर्शात्, द्रव्यं सत्त्वादित्यादौ शीतस्पर्शान्यत्वरूपान्यत्वादेर्वारणाय । तत्रेत्यादि । तत्र साध्यविशिष्टे

एकव्यक्तीति । विभिन्नव्यक्तिके न्यूनवृत्तिसामानाधिकरण्यस्याधिकवृत्तिसामानाधिकरण्याव्यापकत्वमिति स्फोरयितुम् साधनतावच्छेदकावच्छिन्नस्य फलमाह, न वेति । शीतस्पर्शान्यत्वेत्यादि-निःस्नेहं स्पर्शादित्यत्र शीतस्पर्शान्यत्वस्य साधनव्यापकतया सर्व्वसम्मतम् एवानुपाधित्वं,रूपान्यत्वस्य तु साधनाव्यापकत्वेऽपि द्रव्यत्वाभावविशिष्टसत्तावति स्पर्शादौ सत्त्वेन विरोधाभञ्जकतया (१) एतन्मत एवानुपाधित्वमिति। (२) सामानाधिकरण्येनेति सामानाधिकरण्यप्रत्यासत्त्याव्यावर्त्तकं साध्यविशिष्टसाधनभेदकं, तथाच शीतस्पर्शान्यत्वरूपान्यत्वयोर्भेदकत्वाभावान्नातिव्याप्तिरिति भावः, तेन घटव्यधिकरणस्य घटत्वस्य तद्व्यावर्त्तकस्यापि वैलक्षण्यं सूचितम् ।

---

(१) इं, विरोधात्तद्व्यञ्जकतया ।

(२) इं, सामानाधिकरण्येनेत्यादि नातिव्याप्तिरिति भाव इत्यन्तं नास्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधने विशेषणं साध्याभावविशिष्टात्साधनात् सामानाधिकरण्येन व्यावर्त्तकं साध्याभावविशिष्टनिरुक्तसाधनवदवृत्तीति यावत्, एवञ्च द्रव्यं सत्त्वादित्यत्र सत्ताया अभेदेऽपि गुणकर्म्मान्यत्वेनाव्याप्तिः। नापि द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यत्र गुणान्यत्वादौ, इत्यञ्च साधनतावच्छेदकस्यानवच्छेदकत्वद्योतनाय परं तद्भिन्नत्वमुक्तं, न तु विवक्षितमेव तत् वैयर्थ्यात्, इदं दधि जन्यं वा दध्न इत्यादौ दधित्वाद्यव्याप्तेश्च।

नन्वेकस्य हेतोः कथं साध्यतदभावविशिष्टस्वस्मात् स्वस्य व्यावर्त्तकत्वमित्यत आह, * साध्याभावविशिष्टेति। निरुक्तं साधनतावच्छेदकावच्छिन्नम्, इदमेव विशदयति, एवमिति। निरुक्तस्य व्यावृत्तिमाह, नापीति। इत्यञ्चेति। अतएव सामञ्जस्ये इत्यर्थः। अनुकूलत्वमुक्त्वा प्रतिकूलत्वमप्याह, इदमिति। साध्यञ्च नोपाधिरित्यत आह, जन्यं वेति। न चात्र विवक्षायां जातिमान् मेयत्वादित्यादौ जात्यभाववति मेयत्वाधिकरणे समवायसम्बन्धेन वृत्ते-

---

* विशेषणमिति तथाच साध्यविशिष्टसाधनं साध्याभावविशिष्टसाधनात् भिद्यते उपाधिसामानाधिकरण्यमित्यर्थः, तेन स्नेहाभावविशिष्टस्पर्शस्य साध्याभावरूपस्नेहविशिष्टस्पर्शभेदे साध्यशीतस्पर्शान्यत्वसामानाधिकरण्यादिति हेतुर्व्यभिचारी शीतस्पर्शे शीतस्पर्शान्यत्वसामानाधिकरण्यं तेन साध्याभावरूपस्नेहविशिष्टस्पर्शभेद इति न शीतस्पर्शान्यत्वमुपाधिरिति रूपान्यत्वमप्येवं, ननु तथापि द्रव्यं सत्वादित्यत्र गुणकर्म्मान्यत्वं नोपाधिः स्यात्. द्रव्यत्वविशिष्टसत्वे द्रव्यभेदविशिष्टसत्वभेदाभावादित्यत आह। साध्येति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्वा,प्रकृतसाधनतावच्छेदकानवच्छेद्यप्रकृतसाधननिष्ठ-साध्यसम्बन्धितावच्छेदकत्वं पूर्व्वदलार्थः, अनवच्छेदक-त्वञ्च तस्य साध्याभावविशिष्टसाधनवृत्तितया तद्विशि-ष्टसाधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववतस्त-

---

दप्रसिद्धेः सत्त्वाद्युपाधावव्याप्तेः, सिद्धान्तलक्षणोक्तखण्डयोः प्रसिद्धा-वेव सुलभत्वादिति, साध्याभावविशिष्टसाधनाऽधिकरणत्वव्यापकी-भूततत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगीति(१)तद्दलार्थ-इत्यपि केचित् । अत्र च तत्सम्बन्धः साध्यविशिष्टसाधनव्यापकता-घटकसम्बन्धाः बोध्याः । साधनतावच्छेदकभिन्नेनेति (२) सार्थकी-कर्त्तुमाह, यद्वेति । पूर्व्वकल्पे तत्र विशेषणमित्यस्य(३) साध्याभाव-विशिष्टसाधनवदवृत्तितया व्याख्यातस्य बलादेव सद्धेतुत्वनिरासः । अत्र तु यथा व्याख्येयस्य सद्धेतावपि सत्त्वादाह, प्रकृतसाधनता-वच्छेदकेत्यादि । तथाच सद्धेतौ साधनतावच्छेदकावच्छेद्या साध्य-सम्बन्धितेति तन्निरासः । तस्य साधनतावच्छेदकस्य । ननु द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यादौ गुणकर्म्मान्यसत्तात्वस्य द्रव्य-त्वाभावविशिष्टसत्तावृत्तितया विवक्षितस्य सत्त्वात्, गुणकर्म्मान्य-सत्त्वादावतिव्याप्तिरित्यत आह, तद्विशिष्टेति । साधनतावच्छेदक-विशिष्टेत्यर्थः (४), तथाच गुणकर्म्मान्यसत्तात्वविशिष्टस्य न साध्या-भाववद्वृत्तित्वमिति भावः । ननु तथापि विशिष्टस्य अनतिरिक्त-

---

(१) इ, तद्विदलार्थः । (३) इ, पूर्व्वकल्पविशेषणमित्यतः ।

(२) इ, भिन्नेति । (४) इ साधनतावच्छेदकविशिष्टेत्यर्थः एतत्पाठो नास्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विशिष्टसाधनवत्त्वेनेति यावत्, एतेन धूमवान् मेयवत इत्यादौ मेयानवच्छेद्यसाध्यसम्बन्धाप्रसिद्धिः, गुणवद्-गुणकर्म्मान्यत्वे सति जातिमत्त्वादित्यादौ जातित्वघट-कनित्यत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुण-कर्म्मान्यत्वादेरुपाधितापत्तिश्चेति निरस्तम्, अवच्छेद-कत्वञ्च सामानाधिकरण्येन, तथाच साध्यविशिष्टस्य साध्यसम्बन्धितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसा-धनस्य व्यापकत्वमर्थः पर्य्यवस्यति, उपदर्शितशीत-

---

त्वात्तद्दोषतादवस्थ्यम् इत्यत आह, साध्याभाववत इति। अत्र यद्यपि विशिष्टस्यानतिरिक्तत्वेन साध्याभाववत्यपि गुणादौ सत्ता-वत्त्वेन तद्विशिष्टसत्तावत्त्वं, तथापि तथा प्रत्ययाभावान्न (१) तथा-त्वमिति। एतेन ईदृशावच्छेदकत्वस्याविवक्षणेन। ननु तथापि बहूनां मेयानाम् अवच्छेदकत्वमपेक्ष्य एकमेव लघु केवलान्वयि-मेयत्वमवच्छेदकं वक्तव्यं, तथाच तदनवच्छेद्या सम्बन्धिता मेयवति वर्त्तत एव। यद्वा स्वानवच्छेदकतत्कत्वं वाच्यं, तथाच यत्किञ्चिन्मेये स्वानवच्छेदकं सुलभमिति तस्यानुयोगितया तदंशे न सामान्या-भावप्रवेश इत्यत आह, गुणवदिति। अत्र च जातित्वस्य समवेत-त्वगर्भतया तन्मात्रस्यैव सम्यक्त्वमित्यभिप्रायः, द्रव्यं सत्त्वादित्यादौ न्यूनवृत्तिघटत्वादावतिव्याप्तिवारणायाह, तथाचेति। साधनताव

---

(१) इं, प्रत्ययाभावादेवा तथात्वम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पर्शान्यत्वादिवारणाय, तत्रेत्यादि । तत्र साधनताव-च्छेदकविशिष्टे साधने, विशेषणं साध्यशून्याद्व्यावृत्त्यौ-पयिकं, यत्सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभाववति न वर्त्तत इति यावत्, साध्याभाव-विशिष्टप्रकृतसाधनाधिकरणसामान्यात् साध्यविशिष्ट-प्रकृतसाधनाधिकरणसामान्यस्य व्यावर्त्तकमिति समु-दयार्थनिष्कर्ष इत्याहुः ।

च्छेदकभिन्नेनेति सार्थकीकर्त्तुं चरमदलं सद्धेतुसाधारणं व्याचष्टे । तत्रेति । व्यावृत्त्यौपयिकं साध्याभाववतः । यदिति, यत्पदमुपाधि-परम् । प्रकृतेति, साधनतावच्छेदकावच्छिन्नमित्यर्थः । तेन द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यादौ गुणान्यत्वेनाव्याप्तिः निष्कृष्टं कल्पान्तरमाह, साध्याभावेत्यादि । पूर्व्वकल्पस्य निष्कर्षोऽयमि-त्यन्ये । प्रकृतेति, साधनतावच्छेदकावच्छिन्नेत्यर्थः ।

तेन द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यादौ गुणान्यत्वस्य संग्रहः, द्रव्यं सत्त्वादित्यादौ गुणान्यत्वस्य द्रव्यत्वाभाववद्गुणव्यावर्त्तकत्वादाह, सामान्यादिति । तथाच कर्म्माव्यावर्त्तकत्वेन (१) न तत्रातिव्याप्ति-रिति । प्रकृतेति, साधनतावच्छेदकावच्छिन्नेत्यर्थः । तेन द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ द्रव्यत्वविशिष्टसत्ताधिकरणसामान्या-

---

(१) इं, कर्म्माव्यापकत्वेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केचित्तु विशेषणं सामानाधिकरण्यं, तथाच सामानाधिकरण्यप्रत्यासत्त्या येनावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति यावत्, अवच्छेदकत्वञ्चेदमन्यूनानतिरिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिकरण्यस्याक्षतमेव । यद्यपि वायुः प्रत्यक्ष उद्भूतरूपवत्त्वादित्यत्र महान् अनित्यद्रव्यत्वादित्यत्र महत्त्वस्यानित्यद्रव्यसमवेतत्वस्य च वक्ष्यमाणलक्षणाक्रान्तस्योपाधेः

व्यावर्त्तकत्वेऽपि (१) स्पर्शवत्त्वेनाप्रसङ्गः । द्रव्यं सत्त्वादित्यत्र घटत्वादावतिव्याप्तिवारणाय सामान्येति ।

सार्व्वभौममतमवलम्बमान आह, केचित्त्विति । उपाधेर्हेत्ववृत्तित्वेन विशेषणत्वं न घटते इत्यत आह, सामानाधिकरण्यमिति । ननु तथाप्युपाधेः सम्बन्धितासामानाधिकरण्यमेतदेवाह, (२) तथाचेति । सामानाधिकरण्यस्य प्रत्यासत्तित्वे मानाभावादाह, अवच्छेदकीभूतेति । नन्ववच्छेदकत्वं स्वरूपसम्बन्धविशेषः, तच्चार्द्रेन्धनप्रभववह्निमत्त्वस्यैव कल्प्यते, न त्वार्द्रेन्धनप्रभववह्निसमानाधिकरणस्येत्यतः पारिभाषिकं, तदाह, अवच्छेदकत्वञ्चेति । अतएवाह, गुरोरिति । उद्भूतेति । वक्ष्यमाणलक्षणाक्रान्त्यर्थं अन्यथा प्रत्यक्षत्वाभावविशिष्टरूपवतां चक्षुरादीनामव्यावर्त्तकत्वेन महत्त्वस्यानुपाधित्वं स्यादिति । अत्रो-

---

(१) ङ, न क्षतिः । (२) ङ, सम्बन्धितासामानाधिकरण्याभावादाह ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनाति-रिक्तवृत्ति, तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुनिष्ठं यत्सामानाधिकरण्यमन्यूनानतिरिक्तवृत्ति-

---

पाधिसामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनवृत्त्यतिरिक्त-वृत्त्यपि, प्रत्यक्षत्वसामानाधिकरण्यस्य गुणत्वादौ वर्त्तमानत्वात्तत्र तदभावान्महत्त्वसामानाधिकरण्यस्य गगनत्वादौ विद्यमानत्वा-त्तत्रैतदभावाच्च, हेतुनिष्ठेति। तथापीत्यादौ हेतुनिष्ठेत्यत्र हेतु-तावच्छेदकावच्छिन्नहेतुर्वक्तव्य इत्यभिप्रायादुदाहरणान्तरमाह, महानिति। अनित्यपदं वक्ष्यमाणलक्षणाक्रान्त्यर्थम्। तेन मह-त्त्वविशिष्टद्रव्यत्ववति गगनादावनित्यसमवेतत्वस्यावर्त्तमानत्वेऽपि न क्षतिः। अत्र हेतुनिष्ठसामानाधिकरण्यमित्युक्तेऽपि न निर्व्वाहः, अनित्यद्रव्यत्वस्य द्रव्यत्वाभिन्नतया गगनावच्छेदेनापि हेतौ महत्त्वसामानाधिकरण्यस्य विद्यमानत्वात्तदवच्छेदेन चोपा-धिसामानाधिकरण्याभावादिति, अत्रापि यथाश्रुते उपाधिसामाना-धिकरण्ये साध्यसमानाधिकरण्यन्यूनातिरिक्तवृत्त्येवाऽत्र महत्त्व-सामानाधिकरण्यस्य गगनत्वादौ विद्यमानत्वात्तत्रोपाधिसामाना-धिकरण्याभावादुपाधिसामानाधिकरण्यस्य रूपत्वादौ विद्य-मानत्वात् साध्यसमानाधिकरण्याभावात्, तथापीत्यादिहेतुद्वय एव हेतुतावच्छेदकावच्छिन्नत्वं बोध्यम्, आद्यहेतुतावच्छेदकाव-च्छिन्नत्वप्रयोजनन्तु उपदर्शितं, द्वितीयोदाहरणभागे द्वितीयस्य तु द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यादौ कर्म्मावच्छेदेनापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वं विवक्षितं सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यं च तन्निष्ठकर्म्मान्यत्वसामानाधिकरण्यमतिरिक्तवृत्ति, गुणे तदभावावच्छेदकावच्छिन्नवृत्तिकत्वात्, पृथिवीत्वादिसामानाधिकरण्यन्तु न्यूनवृत्ति, जलादौ तदवच्छेदकावच्छिन्नवृत्त्यभावप्रतियोगित्वात्, साध्यव्यापकानां सद्धेतावुपाधित्ववारणाय, साधनतावच्छेदकभिन्नेनेति तदनवच्छेद्यार्थकमित्याहुः ॥ २० ॥

हेतौ गुणान्यत्वस्य सामानाधिकरण्यसत्त्वेऽपि नाव्याप्तिरिति, अन्यूनानतिरिक्तमित्यत्रानतिरिक्तत्वस्य प्रयोजनमाह, सत्त्वनिष्ठेति। गुण इति। तदभावो द्रव्यत्वसामानाधिकरण्याभावः। अन्यूनवृत्तित्वस्य फलमाह, पृथिवीत्वेति। जलादाविति। तदवच्छेदकं द्रव्यत्वसामानाधिकरण्यावच्छेदकम्। ननु साध्यसम्बन्धितायाः साधनतावच्छेदकभिन्नत्वमेवेति, तस्मिन् दत्तेऽपि न वारणमित्यत आह, तदनवच्छेद्येति। (१) तथाच हेतुनिष्ठसाधनतावच्छेदकानवच्छेद्यसाध्यसामानाधिकरण्यावच्छेदकत्वसमनियतं हेतुनिष्ठं यत्सामानाधिकरण्यावच्छेदकत्वतत्त्वमुपाधित्वमिति। नन्वीदृग्नियम एव कथं प्राभाकरमते निरटङ्कि, प्रत्यक्षो मूर्त्तत्वादित्यत्र मूर्त्तत्वं प्रत्यक्षत्वव्यभिचारिमूर्त्ते उद्भूतरूपव्यभिचारित्वात् इति व्यभिचारसाधकस्य मूर्त्तत्वादेरपरिग्रह इति ॥ २० ॥

---

(१) इ, तथाच इत्यादि उपाधित्वमित्यन्तपाठो नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतएव च तत्र साध्यसम्बन्धितावच्छेदकरूप-लक्षणा व्याप्तिः, साधनताभिमते च कास्तीति स्फटिके जवाकुसुमवदुपाधिरसावुच्यते, लक्षणन्तु साध्यसाधन-सम्बन्धव्यापकत्वे सति साधनाव्यापकत्वं, विषम-

ननु सर्व्वत्र सोपाधौ सर्व्वेणोपाधिना साध्य-सम्बन्धोऽवच्छिद्यत इति न नियमः, अयं प्रत्यक्षो मूर्त्त-त्वादित्यादावुद्भूतरूपवत्त्वादेः तदसम्भवादित्यत आह, अतएव च तत्रेति । यत एवोद्भूतरूपवत्त्वादेर्न तथात्व-सम्भवः, अतएव तत्र तादृशनियमवादिमते इदं, लक्षण-मिति, साधनाव्यापकत्वमिह साध्याभावविशिष्टसाधन-व्यापकीभूताभावप्रतियोगित्वं, तादृशसाधनासामाना-धिकरण्यमिह पर्य्यवसितं, तेनोपदर्शितोद्भूतरूपवत्त्व-व्युदासः । अथ प्रत्यक्षो द्रव्यत्वादित्यादौ घटत्वादा-वतिव्याप्तिः, साध्यव्यापकत्वेन विशेषणे च स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तिरत

आभाष्यमानलक्षणकर्त्तुस्तदलक्षणत्वमेवेति व्यञ्जयन्नाह, न-न्विति । नन्वेतल्लक्षण एव यथाश्रुते कथं तन्निरास इत्यत आह, साध-नाव्यापकत्वमिहेति, व्यापकत्वपर्य्यन्तप्रवेशे गौरवादाह, तादृशेति । तेनेति । प्रत्यक्षत्वाभाववति मूर्त्ते परमाण्वादावपि उद्भूतरूपस्य वर्त्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्तस्तु नोपाधिपदवाच्यः प्रवृत्तिनिमित्ताभावात्, दूषकता च तस्य व्यभिचारोन्नायकतया। न च व्यभिचारोन्नायकत्वमेवोपाधित्वम्, अप्रयोजकसाध्यव्यापकव्यभिचारिणोऽप्युपाधित्वापत्तेरिति ॥ २१ ॥

इति तत्त्वचिन्तामणौ विशेषव्याप्तिः समाप्ता।

उक्तं, साधनसम्बन्धेत्यादि। साध्याभावसम्बन्धिनि विरुद्धस्य साध्यसम्बन्धस्यावच्छेदभेदं विनानुपपद्यमानस्यावच्छेदकीभूयोपपादनमुपाधिफलं तदसमर्थानाञ्चोपदर्शितोद्भूतरूपवत्त्वादीनां नोपाधिभावः सम्भवतीत्याह, व्यभिचारिणोरिति। व्यभिचारः सपक्षविपक्षवृत्तित्वम्।

अथ विपक्षगामित्वरूपव्यभिचारोन्नयनमेवोपाधिफलं

मानत्वेनेत्यर्थः। साध्यव्यापकत्वेनेति, साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकत्वेनेत्यर्थः। नन्वीदृशविवक्षयैव कथमुद्भूतरूपादीनां वारणमित्यनुशयान उत्तरग्रन्थं योजयन्नाह, साध्याभावसम्बन्धिनीति। तथाचोपाधावपि ईदृशफलवादीनां गुरूणां तदलक्ष्यमेव तदुक्तव्याख्यानद्वयमदुष्टमिति भावः, विपक्षगामित्वरूपव्यभिचारे तस्य विरुद्धसाधारणतया तथोक्तविरोधापादनं न घटत इत्यत आह, व्यभिचार इति। विपक्षसमित्वोन्नयनं तृतीयाऽत एवेत्यनेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तच्चोद्भूतरूपादीनामप्यस्तीत्यत आह, अतएवेति। यत एव साध्यसम्बन्धितावच्छेदकं रूपं व्याप्तिः, सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं न साध्यसम्बन्धितावच्छेदकम्, अतएव स्वसमीपवर्त्तिनि स्वसमानाधिकरणे व्यभिचारिणि हेतौ स्वनिष्ठसाध्यसम्बन्धितावच्छेदकरूपलक्षणव्याप्तिसंक्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्य्यैरनुमन्यत इत्याह, अतएवेति।

साध्यन्यूनवृत्तावुपाधिव्यवहारं दूषणौपयिकरूपस्यावश्यं वाच्यतयोपाधिपदस्य योगरूढ़ित्वव्यवस्थापनेन निराकुरुते, लक्षणान्त्विति। लक्षणं दूषणौपयिकं रूपम्।

साध्येति। अत्र साध्यव्यापकमात्रं विवक्षितं, तावतैव साधनवृत्तितद्व्यतिरेकेण साध्यव्यतिरेकानुमानसम्भवात्। साधनवति व्यापकनिवृत्त्या साध्यसाधन-

---

तदनभिमतं च वर्णयन्नाह, अथेति। मणिकार एव अतएव तन्नयेन प्रभाकरमतमुष्टम्भकीकृत्याचार्य्यमतमुपष्टम्भयतीति वर्णयन्नाह, अत एवेति। गुरुमते द्रव्यं सत्त्वादित्यत्र गुणकर्म्मान्यत्वमप्युपाधिः। आचार्य्यमते तु तस्य व्याप्यत्वाभावान्नेति विशेषो बोध्यः। इत्यत्र साधनतावच्छेदकस्यानवच्छेदकत्वमादाय उपष्टम्भः व्यवहारं निराकुरुत इत्यन्वयः। नन्वनुपदमेव स्वनिष्ठव्याप्तिसंक्रामकत्वं लक्षणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धनिवृत्तिसिद्धावर्थात्साध्यनिवृत्तिः। सिध्यतीति। प्रकारान्तरप्रदर्शनाय परं तथाविधोक्तिः। रूढ्या न्यूनवृत्तावुपाधित्वव्यवहारं निरस्य योगेनाधिकवृत्तौ तन्निरस्यति, विपक्षेति। प्रवृत्तिनिमित्तं यौगिकं व्यभिचारोन्नायकत्वमेवेत्येवकारेण योगार्थानादरं सूचयति। उपाधित्वम् उपाधिपदप्रवृत्तिनिमित्तम्, उपाधिता उपाधिपदवाच्यता, योगादरे तु लाघवात्साध्यव्यापकतामात्रे रूढ़िरिति भावः॥ २१॥

इत्यनुमानदीधितौ विशेषव्याप्तिः समाप्ता।

क्तं, तत्कथमिदं लक्षणमित्यत आह, लक्षणमिति। प्रकारान्तरेति। तथाचेत्थं व्यभिचारमनुमापयितुरेव तथा लक्षणमिति, तं उपाधिव्यवहारं, ननु प्रवृत्तिनिमित्तत्वं यदि शक्यतावच्छेदकत्वं तच्चरूढ़िविषयतावच्छेदकत्वस्यैवेति अत आह, प्रवृत्तिनिमित्तमिति। सूचयतीति। तथाच तदनन्तरमेव तदुत्थानं घटत इति। ननु पदप्रवृत्तिनिमित्तव्यवस्थापने उपाधित्वव्यवस्थापनमसङ्गतमित्यत आह, उपाधित्वमिति। एवमग्रेऽपि। ननु अयोगादेरपि व्यभिचारोन्नापकत्वमेव कथं परित्यक्तमित्यत आह, लाघवादिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ व्याप्तिग्रहोपायः ।

तत्त्वचिन्तामणिः ।

सेयं व्याप्तिर्न भूयोदर्शनगम्या दर्शनानां प्रत्येकमहेतुत्वात् आशुविनाशिनां क्रमिकाणां मेलकाभावात्,

---

अथ व्याप्तिग्रहोपायः दीधिति ।

व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्व्वकं स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति, सेयमित्यादिना । दर्शनानां प्रत्येकं वा हेतुत्वं मिलितानां वा, मिलनमपि स्वरूपतो व्यापारतो वा आद्ये दर्शनानामिति, द्वितीये आशुविति क्रमिकाणा-

---

मात्रपदेन तस्यैव व्यावृत्तिः, अप्रयोजकेत्यादिमूले तु तादात्म्येन सङ्गमनीयमिति हृदयम् ॥ २१ ॥

इति महामहोपाध्यायकृष्णदाससार्व्वभौमस्खलितायामनुमानदीधितिप्रसारिण्यां विशेषव्याप्तिः समाप्ता ।

अथ व्याप्तिग्रहोपायः प्रसारिणी ।

मूलीयप्राथमिकं प्राभाकरमतं सङ्गमयन् तदीयं सेयमिति च व्याचक्षाण आह, व्याप्तीति । परमतनिराकरणपूर्व्वकमित्यभिधानक्रियाविशेषणं, तथाच तत्र (१) गतीति भावः ।

स्वरूपत इति । कार्य्याव्यवहितप्राक्काले स्वरूपेण सत्त्वमित्यर्थः ।

---

(१) इं, तत्र गतीति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्ति-धीहेतवः प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यं, समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुरतः कथं संस्कारेण व्याप्तिज्ञानं जन्येत, अन्यथाति-प्रसङ्गः ॥ १ ॥

मपि स्थिराणामस्थिराणामपि सहोत्पन्नानां मिलन-मस्तीत्युभयमुपात्तम्। तृतीयमाशङ्क्य निराकुरुते, न चेति। व्यापकसाध्यसामानाधिकरण्यात्मिकायां व्याप्तौ साध्यसामानाधिकरण्यांशस्य प्रथममेव गृहीतत्वाद-गृहीतव्यापकत्वांशग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वं वाच्यम्। तच्च न सम्भवति भिन्नविषयकत्वा-दित्याह, समानेति। भ्रमस्त्वगृहीतभेदं ज्ञानद्वयं, न तु वैशिष्ट्यावगाहीति भावः ॥ १ ॥

व्यापारत इति। तदानीमेव व्यापारसत्त्वमित्यर्थः। दर्शनाना-मितीति। तथाच मूले प्रत्येकं व्यभिचारादेवाहेतुत्वमिति। तृतीयं व्यापारतो मिलनम्। सामानाधिकरण्यांशमादाय मूलस्थं समानविषयकेत्यादि सम्भवत्येवेत्यतो व्याचष्टे। व्यापकेति। ननु समानविषयत्वेन संस्कारजनकत्वावधारणे रजतत्वगोचरेण संस्कारेण कथं सम्बन्धावगाहनमित्यत आह, भ्रमस्त्विति। यद्यपि रजतत्वगोचरः संस्कारः प्रायशस्तत्सम्बन्धगोचरः सम्भवत्येव, तथापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किञ्च सम्बन्ध भूयो दर्शनं भूयःसु स्थानेषु दर्शनं, भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा, एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात् एकत्रैव धारावाहिके तद्धीप्रसङ्गात्, भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमाच्च। अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात्, तर्कसहकृतं तथेति चेत्तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात्, किं भूयो

न तथा न व्याप्तिग्राहकं व्यभिचारदर्शनं व्यापारतया सहकारीति व्यभिचारादर्शनसहचार-

---

यत्र रजतत्वमात्रगोचरःसंस्कारस्तन्मात्रांशे हेतुत्वात् उद्बोधकसमवधानं वा तत्रापि भ्रमो भवत्येवेत्यभिप्रायः। न च तथापि शुक्तिसन्निकर्षस्यैव तत्सम्बन्धभासकत्वमिति वाच्यम्। प्रकारत्वान्यथानुपपत्त्यैव प्रकारभानसामग्र्या एव सम्बन्धभासकत्वाभ्युपगमात्, संवादिप्रत्यभिज्ञायां च सम्बन्धसन्निकर्ष एव सम्बन्धभासक इति हृदयम् ॥ १ ॥

अग्रे तथेत्यस्यान्यथापि सत्त्वात् नकारसमवहितमेव पाठं गृह्णन् व्याचष्टे, न तथेति। सहचारदर्शनव्यभिचारादर्शनसहकृता इति मूलं तत्र व्यभिचारादर्शनस्यात्र हेतुत्वे तर्कोऽन्यथा सिद्ध इत्यत आह, व्यापारतयेति। तथाच व्यापारिणो नान्यथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दर्शनेन न च तेन विना तर्क एव नावतरति, प्रथमदर्शनव्युत्पन्नस्य तर्कसम्भवात्, नचैवमेवास्तु तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात्, जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनकव्याप्तिज्ञानं तर्कं विनैवातो नानवस्थेति चेत्तर्हि व्यभिचारात्, सोऽपि न व्याप्ति-

---

दर्शनसहकृतस्तर्क एव व्याप्तिग्राहकः भूयो दर्शनन्तु क्वचित्तर्कप्रवृत्तावुपयुज्यत इति निर्गलितम्। नैयायिकमतमाशङ्क्य निराचष्टे, न चैवमिति। जातमात्रस्येति। तथाच तन्मूलको व्याप्त्यन्तरग्राहकतर्कावतार इति भावः। तर्हीति। न च व्याप्तिप्रत्यक्षं प्रति तर्को हेतुस्तत्तु स्मरणमिति न व्यभिचारावकाशः, विनानुभवं स्मरणस्यायोगात्। न च जन्मान्तरीणः सः जन्मान्तरेऽपि पर्यनुयोगतादवस्थ्यात्, अना-

---

सिद्धिरिति भावः। (१) प्रथमदर्शनेऽपीत्यादिफक्किकार्थस्याव्यवहितप्रक्रान्तस्यानुकर्षणभ्रममवतारिकाव्याजेन निराकरोति, व्यभिचारादर्शनेत्यादि। वह्निधूमव्याप्तिग्रहे किमायातं तत्राह, तन्मूलेति। व्याप्त्यन्तरेति। यद्यपि स्तनपानेष्टसाधनताघटितव्याप्तेर्धूमादिव्याप्तिग्राहकत्वे मानाभावस्तथापि गृहीतायां तस्यां प्रतिवन्धिविधया

---

(१) इं, प्रथमदर्शने इत्यादि तन्मूलेति पाठः नास्तीति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रहे हेतुः, न चैतद्गुद्भाववान्तरजातिरस्ति सामान्यप्रत्या-
सत्त्या सर्व्वोपसंहारादविनाभावग्रहः, सामान्यरूपता च
सकृद्दर्शनगम्येति भूयो दर्शनापेक्षेति चेन्न, सामान्यस्य
हि प्रत्यासत्तित्वं लाघवात्। न तु सामान्यतया ज्ञातस्य
तदनभ्युपगमाच्च ॥ २ ॥

न च काकतालीयत्वादिशङ्काव्युदासार्थं द्विती-
यादिदर्शनापेक्षेति वाच्यम्। द्वितीयादिदर्शनेऽपि
सङ्घातादवस्थ्यात्। नत्वनौपाधिकत्वज्ञानं व्याप्ति-
ज्ञाने हेतुः, तद्देशकालतत्वावस्थितघटादीनामुपाधि-

दित्वेन च परिहारः परतो विचारयिष्यते। न चेति।
मानाभावात् तर्कस्य च हेतुत्वासिद्धेः, यदि चागृही-
तस्यागृहीतपुरोवर्त्तिसंसर्गस्य वा प्रत्यासत्तित्वेऽतिप्रसङ्ग-
स्तदा पुरोवर्त्तिनि तद्ग्रहो मृग्यतां न तु सामान्यत्वे-
नेत्याह, न त्विति ॥ २ ॥

कारणं विना कार्य्योत्पत्तिशङ्काविघटनमिति हृदयम्। परत
इति। अनादिसिद्धकार्य्यकारणभावादिमूला इत्यत्रानादित्वेनान-
वस्थापरीहारः। (१) ननु सिद्धे तर्कस्य हेतुत्वे स्वर्गादाविव फल-
वैजात्यं कल्प्यतां तत्राह, मानाभावादिति। ननु तत्र तर्कस्य
हेतुतैव मानं तत्राह, तर्कस्य चेति। दोषकालीनशुक्तिसन्निकर्षे

---

(१) इं, नन्वित्यादि तर्कस्य व्याप्तपाठो नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वशङ्कानिरासः कस्यचित् साधनव्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्वज्ञानेन स्यात्, तच्च भूयो-दर्शनं विना नावतरतीति चेन्न, अयोग्योपाधिव्यति-रेकस्यानुमानाधीतज्ज्ञानत्वेनानवस्थापातात्।

अथ साध्यसाधनसहचरितधर्म्मान्तराणामुपाधित्व-संशये न व्याप्तिग्रहः, अतस्तेषामनुपाधित्वज्ञानं भूयो दर्शनाधीनसाध्याव्यापकत्वज्ञाने सतीत्येतदर्थं भूयो दर्शनापेक्षा अतएव यावता दर्शनेन तन्निश्चयस्तावद्भूयो दर्शनं हेतुरिति न वारसंख्यानियमो न वाऽननुगमः, यद्यपि चान्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वसंशयो नान्यव्याप्तिग्रहप्रतिवन्धकस्तथापि तदाहितव्यभिचार-संशयः प्रतिबन्धक इति तद्विधूननमावश्यकमिति चेन्न, अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनु-च्छेदात्, स च न भूयोदर्शनान्नाप्यनुमानादित्युक्तम्।

साध्यव्यापकत्वं साध्यसमानाधिकरणाभावप्रति-योगित्वं तद्ग्रहश्च साध्याधिकरणैकव्यक्तिवृत्तितया गृह्यमाणस्य तादृशव्यक्त्यन्तरग्रहं विना न सम्भवति,

---

सति शुक्तित्वं प्रमेयमिति स्मरणस्यापि न सामान्यजनाज्ज्ञानमित्यत आह, अगृहीतपुरोवर्त्तीति ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपि च भूयोदर्शनाहितसंस्कारो न वहिरिन्द्रियसह-
कारी तद्व्यापारं विनापि च सहचारादिज्ञानवतो
व्याप्तिग्रहात्, नापि मनस इन्द्रियादिवद्भूयोदर्शनजन्य-
संस्कारस्य तज्जन्यस्मरणस्य वा प्रमाणान्तरत्वापत्तेः,
तस्मात् परिशेषेण सकृद्दर्शनगम्या सा, तथा ह्युपाध्य-
भावो व्याप्तिः, अभावश्च केवलाधिकरणं तत्काल-
सम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा, तच्च प्रथमदर्श-
नेनावगतमेव चक्षुरादिना न चाधिकस्तदभावोऽस्ति, न
च प्रतियोगिज्ञानमधिकरणादिज्ञानजनकं ये नोपाधि-

इति भूयोदर्शनापेक्षा तदाहितः, संस्कारो वहिरि-
न्द्रियमात्रस्य सहकारी मनसोऽपि वा आद्ये,
तद्व्यापारं विनेति । द्वितीये नापीति परिशेषात्साध्य-
साधनसम्बन्धग्राहकातिरिक्तानपेक्षग्रहकत्वात् उपाध्य-
भावग्राहकस्यापेक्षणीयत्वादसिद्धिं निरस्यति, तथा-

न सम्भवतीति अस्मिन्नधिकरणे तस्य विद्यमानत्वादेव
साध्याधिकरणान्तरग्रहाभावे तद्वृत्त्यभावप्रतियोगित्वं दुर्ग्रहमिति ।
तद्व्यापारं विनेति । मूलं सङ्गमयिष्यता वहिरिन्द्रियेत्यत्र मात्र
पदं प्रक्षिप्तमिति ध्येयम् । साध्यसाधनेत्यादि । इयं व्याप्तिः प्राथ-
मिकसाध्यसाधनसम्बन्धग्रहविषयः, साध्यसाधनसम्बन्धग्राहकाति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानं विना तन्न स्यात्, एवमुपाध्यभावे ज्ञाते किञ्चिन्न ज्ञातुमवशिष्यते, उपाध्यभावव्यवहारस्तु तद्वियमपेक्षते दीर्घत्वादिव्यवहार इवावधिज्ञानम्। न चैवं रासभ-सम्बन्धतुल्यवह्निधूमसम्बन्धज्ञानादेवानुमितिः स्यादिति वाच्यम्, उपाधिस्मरणे सत्युपाधितद्व्याप्येतरसकल-तदुपलम्भकसमवधाने चोपाध्यनुपलम्भसहितस्य केव-लाधिकरणज्ञानस्यानुमितिहेतुत्वात्, तद् व्यवहारहेतु-

---

हीति। उपाधिस्मरण इत्यादि। नन्वेवमसन्निकृष्टादि-हेतुकानुमितिर्न स्यात्, उपाधियोग्यानुपलम्भविरहा-दत आह, तद्व्यवहारेति। तथाच तद्व्यवहारस्य हेतु-रेवानुमिति हेतुः तच्चोपाध्यभावत्वेन ज्ञानम्, उपाधि-

---

रिक्तानपेक्षग्रहविषयत्वात् तन्नान्तरीयकपदार्थवदिति परिशेषो बोध्यः। यथाश्रुते तु सकृद्दर्शनग्राह्यमतेऽपि भूयोदर्शनग्राह्यत्व-सम्भवात्तदभावरूपपरिशेषविशेषणं न घटत इति। उपाध्यभाव-ग्राहकस्य तादृशसम्बन्धग्राहकातिरिक्तस्येत्यादि। असिद्धिः हेतु-विशेषणासिद्धिः। इत्यादीति। तथाच तद्ग्राहिका सामग्री अनुमितावेव हेतुर्न तु व्याप्तिग्रहे इति न हेतुविशेषणासिद्धिः, एवं योग्यानुपलब्धेरनुमितिप्रयोजकत्वे असन्निकृष्टादीत्यादिपदे-नातीन्द्रियादिपरिग्रहः। ननु तद्व्यवहार इत्युक्तावपि तद्दोषस्तद-वस्थ इत्यत आह, तथाचेति। तच्चेति। व्यवहारकारणमित्यर्थः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वाच्च। नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चयाद्विशेषदर्शने-सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत् व्याप्तिज्ञानानन्तरं किं विद्यमान एवोपाधिर्म्मयोपाधित्वेन न ज्ञात इति शङ्कया गृहीतव्याप्तावपि संशयः, अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्कापनीयते ॥ ३ ॥

स्मरण इत्यादि तु तत्कारणप्रदर्शनपरम्, अभावत्वञ्चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषोऽतिरिक्तः पदार्थो वेत्यन्यदेतत्। एवञ्चोपाध्यभावत्वेन ज्ञानेऽधिकापेक्षां न वारयाम इति भावः। व्याप्तिस्वरूपे संशयाभाव आपद्यते निरुपाधिसम्बन्धरूपव्याप्तित्वेन वा, आद्ये इष्टापत्तिः। द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्समवधाने सति वा सम्बन्धग्रहे

तदित्यस्य क्वाचित् केत्यादिः। ननु अभावत्वस्याधिकरणानतिरिक्तत्वात् तदपि स्वरूपज्ञानान्नातिरिच्यत इत्यत आह, अभावत्वञ्चेति। अन्यदिति। प्रकारताया वैलक्षण्ये तु विवादाभाव इति भावः।

ननु उपाध्यभावत्वप्रकारकज्ञाने भूयो दर्शनमपेक्षितमिति तवापि सम्मतं, तथाचानुमितिजनकज्ञाने भूयोदर्शनमपेक्षितमिति पर्य्यवसितं विवादेनेत्यत आह, एवञ्चेति। न वारयाम इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्वा ज्ञानप्रामाण्य संशयाद्व्याप्तिसंशयः, यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्प्रामाण्य-संशयाहितस्तत्संशयो न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न वृत्तमिति कल्प्यते, तथेहाप्युपाध्यभावस्य व्याप्तित्वात् तस्य च केवलाधिकरणरूपस्य प्रथम-दर्शनेऽपि निश्चितत्वात्, व्याप्तिग्राहकान्तरस्याभावाच्च, परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात्, तन्निश्चये प्रामाण्यसंशयादेवतत्संशयः। न चैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदः स्यादिति वाच्यम्। तत्र व्याप्तेरभावात्

आद्ये किं विद्यमान इति। तथाच तद्ग्रहमात्रं न तु तदभावत्वेनापि ग्रह इति समानप्रकारकनिश्चयाभावा-त्तत्संशयो नानुपपन्न इति भावः॥ ३॥

द्वितीये, ज्ञानप्रामाण्येति। प्रथमेति। सत्यु-

तथाच व्याप्तिस्वरूपज्ञाने न सम्बन्धग्राहकातिरिक्तापेक्षेति। ननु नैयायिकमतेऽपि व्याप्तेः सामानाधिकरण्यात्मकतया स्वरूपग्रहे नातिरिक्तापेक्षेति, तथैव विवादाभाव इति चेन्नैवं, तन्मते व्याप्ति-स्वरूपस्य व्यभिचाराभावघटिततयाऽस्य चातिरिक्ततया तत्प्रत्यक्षेऽति-रिक्तापेक्षणात् इति भावः॥ २॥

तदग्रहमात्रमुपाध्यग्रहमात्रम्। ननु प्रथमदर्शने निश्चयेऽपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यक्षज्ञाने विषयस्य हेतुत्वात् क्वचिदसंसर्गाग्रहात् तथा व्यवहारो दोषमाहात्म्यात्, न चात्रापि तथा आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमात्। केचित्तु साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यसामानाधिकरण्यं साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं वा व्याप्तिस्तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथममवगतमेव। महानसे योऽत्यन्ताभावोऽन्योन्याभावो-

---

पाधिस्मरणादावित्यादिः। न चात्रापीति। सर्वत्र रासभादावित्यर्थः। अवगत इति। स्वरूपकथनमात्रं, महानस इति। अस्मिन्नित्यादिः। महति वायौ योग्या-

---

उपाध्यभावत्वेन न निश्चयः तत्रोपाधिस्मरणादीनामपेक्षितत्वादित्यतः पूरयति सत्युपाधीति। अत्रापीति इति इदं शब्देन व्याप्तिभ्रमाविषयरासभो यद्यपि गृहीतस्तथापि न्यूनताभङ्गाय सर्व्वशब्देन व्याचष्टे, सर्व्वत्रेति। यत्र तु भ्रमस्तत्र सुतराम् अन्यत्रापि भ्रमे सर्व्वभ्रमे च समुचितमिति भावः। महानस इत्यनन्तरम् अवगत इति, यद्यपि मूलं तथापि अवगतत्वस्य ज्ञानेऽप्रयोजकत्वेनाविवक्षणे महानससामान्यमादायाभावो गृहीतुमशक्य इति महानसपदमवश्यं सङ्कोचनीयमिति व्युत्क्रमेण व्याख्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वावगतस्तस्य प्रतियोगी न वह्निर्न वा वह्निमानित्यनुभवात् रासभे तथावगमेऽप्यग्रे स बाध्यत इति, तन्न एवं हि तद्वह्नितद्धूमयोरेवव्याप्तिः स्यात् न तु धूमत्ववह्नित्वावच्छेदेन न च तदनुमानोपयोगिवह्नित्वं वह्निमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो चातु-

---

योग्ययोर्भूतरूपसामान्यतद्वतोरिव योग्ये वह्नौ तादृशप्रतियोगित्वसामान्यतद्वतोरप्यत्यन्ताभावान्योन्याभावयो--र्योग्यत्वादिति भावः, न प्रतियोगितावच्छेदकमिति न धूमसामान्यसमानाधिकरणतादृशाभावप्रतियोगिता--सामान्यावच्छेदकमित्यर्थः। अथ साधनाव्यापकव्याप्यत्वाभावः साध्येऽधिकरणस्वरूप एव एवं साधननिष्ठसाध्यसम्बन्धे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोऽपीत्यनुशयानो येन रूपेण ज्ञाता, व्याप्तिरनुमित्यङ्गं तद्रूपविशिष्टा न सकृद्दर्शनगम्या, सामानाधि-

---

तम्। इत्यादिरिति। तथाचैतन्महानसवृत्त्यन्त्याभावाप्रतियोगित्वं महानसान्तरासन्निकर्षेऽपि सुग्रहमित्यतो योग्यत्वमेवोपपादयति, महतीति। न प्रतियोगितावच्छेदकमितीति। सामान्याभावस्फुटीकरणाय नकारसम्वलितपाठो धृतः व्याप्तेर्हेतुनिष्ठत्वं कुर्व्वाणो मीमांसकमभिप्रेत्य अनौपाधिकत्वं निर्वक्ति, एवमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मशक्यमेवेति मैवं प्रकृतसाध्यव्यापकसाधनाव्यापको वा साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धितावच्छेदकं विशेषणं वोपाधिः उभयथापि तदभावो न व्याप्तिः सिद्धासिद्धिभ्यां तन्निषेधानुपपत्तेः किन्तु यावत्स्वव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं तस्य च प्रथमं ज्ञातुमशक्यत्वात् । किञ्च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किन्तु व्याप्तित्वेन तच्च उपाध्यभावत्वं न च उपाधेरज्ञाने तदभावत्वेन ज्ञानं सम्भवति विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य न च नियमतः प्रथम-

---

करण्यमात्रस्य च तथा भावं न वारयाम इत्याशयेनाह, किञ्चेति । विशेषणज्ञानसाध्यत्वात् तत्सामग्रीसाध्यत्वाद्वा, न चेति उपलक्षणमेतत् उपाधेरयोग्यस्यापि सम्भवात्, उपाधिसामान्यतद्वतो मूर्त्तत्वादिसामान्यतद्वतोरिवात्यन्ताभावान्योन्याभावयोरयोग्यतया प्रत्यक्षेण ग्रहीतुमशक्यत्वात् । न च योग्योपाधिव्यतिरेकग्रह एवानुमानाङ्गम् अयोग्योपाधिग्रहेऽप्यनुमिति

न वारयाम इति । पूर्व्वं न वारयाम इत्यत्र व्याख्याततत्त्वमेतत् मीमांसकमते विशेषणज्ञानस्याजनकत्वादाह, तत्सामग्रीति । ननूपाध्यभावत्वप्रकारकज्ञानस्यैवानुमितिहेतुत्वकथनात् मूलासङ्गति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुपाधिधीरस्ति। यच्चोक्तं प्रतियोगिज्ञानं व्यवहारहेतुः नाभावज्ञान इत्यस्तु तावदेवं तथापि तदभावो मा व्यवहारि उपाध्यभावज्ञानाधीनानुमितिः स्यादेव उपाधिज्ञानं विनापि न चैवम्। वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्म्मदर्शनाद्व्यभिचारसंशयात् प्रथमदर्शनेन न व्याप्तिनिश्चयः॥ ४ ॥

प्रसङ्गात्। यथाश्रुतं दूषयति यच्चोक्तमित्यादिना व्यभिचारेत्यादि। अत्र प्रत्यक्षे ग्राह्य संशयस्यापि प्रतिबन्धकत्वमादृत्य व्यभिचारशङ्कायास्तथात्वाभिधानम्। अन्यथा पुनरसाधारणतत्तत्कारणमेलकरूपा सामग्री प्रतिबन्धिका वोध्या, विवेचितञ्चेदं प्रत्यक्षमणिदीधितौ, वक्ष्यते चाधिकमुपरिष्टात्॥ ४ ॥

रित्यत आह, यथाश्रुतमिति। ननु ग्राह्यसंशयस्याप्रतिबन्धकत्वात् व्यभिचारज्ञानाभावेत्यादिमूलं कथं सङ्गतमित्यत आह, अत्रेति। अन्यथा ग्राह्यसंशयस्याप्रतिबन्धकत्वे असाधारणेति, कालादिव्युदासाय असाधारणकरणमपि प्रत्येकमतिप्रसक्तमित्यतो मिलनपर्य्यन्तं, ननु निश्चयत्वस्य कार्य्यतानवच्छेदकत्वाद्द्वयमपि न सम्यगिति मनसि कृत्वाह, विवेचितमिति॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात् अन्यथा संशयोत्तरं क्वापि निश्चयो न स्यादिति चेन्न व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः किन्तु विशेषादर्शने सति सह-

---

अत्र च यद्यपि साधनगोचरसाध्याभाववद्वृत्तित्वग्रहाभावोहेतुरिति न युक्तं केवलान्वयिनि ग्राह्याप्रसिद्ध्या ग्रहाप्रसिद्धेः, खण्डशः प्रसिद्ध्या क्वचित्तादृशभ्रमसम्भवेऽपि सर्व्वत्र तथा भ्रमे मानाभावात्। अतएव साध्यतावच्छेदकगोचरसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहोऽपि प्रत्युक्तः सकलसाध्यतावच्छेदके तादृशग्रहे मानाभावात्, तथापि साध्यतावच्छेदके तत्पुरुषीयतादृशावच्छेदकत्वग्रहस्य विषयतयाभावः, तद्विषयत्वाभावो वा तत्पुरुषीयव्याप्तिग्रहे हेतुः

ग्राह्येति। साध्याभावघटितस्याप्रसिद्धिरित्यर्थः। खण्डश इति अभावादौ साध्यीयत्वादिनेत्यर्थः। अतएव सर्व्वत्र तथा प्रसिद्धैव। ननु सर्व्वत्रैव तथा भ्रमो भविष्यतीत्यत आह, सकलेति। साध्यतावच्छेदक इत्यभावेनान्वितं विषयताया अभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावादाह, तद्विषयत्वाभावो वेति। व्याप्तिग्रहकाल एव पुरुषान्तरस्य तादृशविषयत्वसत्त्वादाह, तत्पुरुषीयेति। विषयताया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चारादिसाधारणधर्म्मदर्शनात् संशयः स्यात् न तु संशयसामग्रीतो निश्चय इति। किञ्च यद्वीसामग्री-यत्र प्रतिबन्धिका, विशेषादर्शने तत्र तद्धीरपीति व्यभि-चारसंशयोऽपि प्रतिबन्धकः एवं भूयोदर्शनमपि संशा-यकं तर्कस्त्वनवस्थाग्रस्त एवेति कथं व्याप्तिग्रहः।

वस्तुतो व्याप्तेः साध्यसाधनभेदभिन्नतया विशिष्यैव कार्य्यकारणभावः, तथाच यत्र साधनं साध्याभाववद्वृत्ति-साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगितावच्छेद-कमेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायथं तदभावः पुरुषनिष्ठोव्याप्तिग्रहहेतुः अतएवैक-विधव्यभिचारज्ञानविरहेऽन्यविधव्यभिचारग्रहाद्व्याप्ति--धीविरोधः। एवञ्च क्वचिद्व्यभिचाराज्ञानस्याहेतुत्वेऽपि

ज्ञानानतिरेकेण कालिककादाचित्कत्वमभिप्रेत्यैतदुक्तम्। (१) ननु चैत्रीयज्ञानविषयत्वाभावसत्त्वे मैत्रीयो व्याप्तिग्रहः स्यादित्यत आह, तत्पुरुषीयव्याप्तीति। ननु प्रसिद्धाया इत्यादिवक्ष्यमाणयुक्ते-स्तद्विषयत्वं तवाप्यावश्यकमिति कथं सार्व्वत्रिकत्वमित्यनुशयान-स्तत्पुरुषीयत्वप्रवेशेन कार्य्यकारणभावबाहुल्ये गौरवादाह वस्तुत इति। पुरुष निष्ठ इति। तथाच सामानाधिकरण्यप्रत्यासत्त्यैव

---

(१) इं, नन्वित्यादि व्याप्तीत्यन्तः पाठो नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्रोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकं ज्ञानं निश्चयः शङ्का च सा च

न क्षतिः। प्रसिद्धायाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः, समानविषयतया तदभावबोधविरोधित्वानुरोधेन तु तथात्वकल्पनं न वयं वारयामः यदि तत्तत्प्रकारादिनिवेशेन विशेषे न पर्य्यवस्येदिति दिक्। व्याप्तिश्च धूमादिव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिकं तादृशसामानाधिकरण्यमात्रस्य रासभादिसाधारण्यात्, अत्र च व्यापकत्वांशग्रहे व्यभि-

तस्य हेतुत्वम् इति भावः, अतएव कूटस्य कारणत्वादेव, एवं प्रकृतसाध्यतावच्छेदकप्रकारकव्यभिचारज्ञानाभावस्य हेतुत्वे। ननु धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वग्रहस्तु कुत्रचित्प्रसिद्धः अनवच्छेदकत्वग्रहे प्रतियोगिविधयापि तस्यावश्यकत्वादिति तत् किमर्थं साध्यतावच्छेदकप्रवेशनं तस्य तादृशज्ञानाभावानुयोगितयैवोपपत्तेरित्यत आह, प्रसिद्धाया इत्यादि, तदभावस्तादृशावच्छेदकत्वाभावः, तथा कल्पनं तादृशज्ञानाभावहेतुत्वकल्पनं, न अन्यत्रवृत्तस्य ज्ञानस्य (१) विषयतासम्बन्धेन प्रकृतसाध्यतावच्छेदके तदभावो वर्त्तत एवेति,तस्य समानविषयत्वेनैव कारणत्वमिति पूर्व्वपक्षिणोहृदयं, यदीति यत्र(२) दाहजनकतावच्छेदक-

(१) इ, अन्यत्र वृत्तज्ञानस्य। (२) इ, दाहजनकतावच्छेदेन जातिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्वचिदुपाधिसन्देहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्म्मदर्शनात् तद्विरहस्य क्वचिद्विपक्षबाधकतर्कात्

चाराग्रहः समानाधिकरणवृत्तित्वांशग्रहे च तद्विशेषणतया सामानाधिकरण्यस्य ग्रहोहेतुरिति वक्तव्यम्। साध्यसम्बन्धितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे विशेषणतया सम्बन्धस्य ग्रहो हेतुरित्यपि केचित्। यत्तु विरुद्धे सहचारभ्रमेण व्यापकत्वभ्रमात्सामान्यत एव सहचारज्ञानं हेतुरिति तन्न असिद्धत्वात् विरुद्धेऽपि

जातिस्तथाभावप्रतियोगितावच्छेदिकेति(२) ग्रहो जातस्तत्र वह्नित्वे तत्सत्त्वात्,बोध्यः अथ वह्नित्वत्वेन तत्राभावो वाच्य इति चेत् विशेषव्याप्तिलक्षणे प्रगल्भमतनिराकरणेनैव तस्य निराकृतत्वात्, महानसीयत्वविशिष्टं वह्नित्वमवच्छेदकम् इति ग्रहेऽपि तत्सत्त्वोपगमाच्च अथ शुद्धवह्नित्वेन रूपेणावच्छेदकत्वग्रहस्याभावोवक्तव्य इति चेत् तर्हि तस्य प्रतियोगिकोटावेव विनिवेशनेऽसार्व्वत्रिकत्वसहिष्णुतायां तत्पुरुषीयत्वघटितत्वादनन्तकार्य्यकारणभावगौरवमिति भावः एवं ग्राह्याभावग्रहस्य प्रतिबन्धकतायां तत्र तदधिकरणतावच्छेदकविनिवेशाद्यत्र तादृशग्रहो न प्रसिद्धस्तत्र न तथा हेतुत्वमिति भावः। केचिदित्यस्वरसोद्भावनं तद्बीजन्तु साध्यसम्बन्धितावच्छेदकेत्यत्रैवेति सङ्कोचे प्रमाणाभावः, सामान्यत इति, यद्विषययोः

---

(२) इं. ग्रहेऽपि वह्नित्वे तत्सङ्गतेः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्वचित् स्वतः सिद्ध एव तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत् न यावदाशङ्कं तर्कानुसरणात्, यत्र च

व्यापकत्वसामानाधिकरण्ययोर्ग्राहकसामग्रीक्रमयौगपद्याधीनं ग्रहणक्रमयौगपद्यं नतु मिथः कार्य्यकारणभाव इति।

इदं पुनरवधेयं यथा विद्यमानमपि वह्नित्वे व्यवहितविप्रकृष्टरासभादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वं न गृह्यते अभावदेशविप्रकर्षादिना ग्राहकाभावात् तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽप्यग्रहसम्भवात्। नानुपलब्धेः प्रतियोगिसत्त्व-

---

कार्य्यकारणभाव इत्यादि व्याप्त्युपष्टम्भाच्च इत्यपि द्रष्टव्यम्, असिद्धत्वादिति सहचारभ्रमस्य व्यापकत्वभ्रमाहेतुत्वादित्यर्थः, क्वाचित्कं सहचारभ्रमस्य व्याप्तिभ्रमपूर्व्ववर्त्तित्वमन्यथासिद्धयति विरुद्धेऽपीति। तथाच यत्रैकदैव उभयोर्भ्रमस्तत्रैव व्यभिचाराद्दोषविधयापि न तस्य कारणत्वमिति भावः।

व्यवधानं मध्यस्थित इत्यादिसम्बन्धः, विप्रकर्षो तद्दूरवर्त्तित्वं, कथं चिदिति विरोधस्य तादृशयोग्यानुपलब्ध्या प्रविष्टत्वादिति भावः, झटित्यवभासस्तु प्रकारान्तरेणापीति हृदयम्, अतएवेति यत एव तस्य लौकिकप्रत्यक्षाविषयत्वमिति निर्णयानीत्युपाध्यायाः साधारणे चेति मिश्राः ग्राह्याभावज्ञानमात्रस्य प्रतिबन्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्ति-ग्रहः ॥ ५ ॥

इति तत्त्वचिन्तामणौ व्याप्तिग्रहोपायः समाप्तः ।

विरोधित्वादिलक्षणा योग्यतेति न तत्सामान्याभावो लौकिकप्रत्यक्षगम्यः । परन्तु कथञ्चिद्विरोधस्फोरणादिवशाद्धूमत्वादौ गृहीतो धूमवन्निष्ठात्यन्ताभाव-प्रतियोगितावच्छेदकत्वाभावो तद्भिन्नत्वादावुपनयमर्य्यादया गृह्यते अतएवानुमानादिना व्यभिचारग्रहेऽपि न व्याप्तिधीः, निर्णयात्मनि साधारणे वा दोषविशेषा-जन्योपनीतभाने संशयादिसाधारणस्य निश्चयात्मनो

त्वमते धारावाहिकसंशयानुरोधेन, कार्य्यतावच्छेदकेति निर्ण-यानुधावनं, दोषविशेषेति तेन पीतत्वाभावानुमितावपि पीत इत्युपनीतभानं भवत्येवेति, साधारणस्येत्याद्यमते निश्चयात्मन इति द्वितीये, अत्रापि प्रतिबन्धके निश्चयत्वस्य प्रवेशाद्धारावाहि-कसंशयोत्पत्तिर्बोध्या, मात्रपदं कृत्स्नार्थकं तेन लौकिकालौकिक-साधारण्यलाभः, स्वमते केवलान्वयिखण्डने व्यवस्थाप्यमानव्याप्ति-मभिप्रेत्याह, तत्तद्धूमादाविति । गृह्यमाण इति ननु कथमत्र योग्यानुपलब्धिः देशान्तरवृत्तित्वस्य द्रव्यत्वादौ सत्त्वेऽपि देशा-न्तरा सन्निकर्षेणैवानुपलम्भसम्भव इति चेन्न फलबलेन तथा कल्प-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वा विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वात्, तत्तद्धूमादौ देशान्तरवृत्तित्वसम्भावनाविरहादिवशात् गृह्यमाणो वह्न्याद्यभाववद्वृत्तित्वाभावो धूमत्वाद्यवच्छेदेन गृह्यते लाघवादित्यपि वदन्ति ॥ ५ ॥

इत्यनुमानदीधितौ व्याप्तिग्रहोपायः समाप्तः ।

नात् यद्वा गृह्यमाणपदेन ग्रहणमुपनीतभानात्मकमेव विवक्षितं, सम्भावनाविरहस्तु प्रतिबन्धकाभावस्फोरणाय ॥ ५ ॥

इति महामहोपाध्यायकृष्णदाससार्वभौमप्रणीतायामनुमानदीधितिप्रसारिण्यां व्याप्तिग्रहोपायः समाप्तः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ तर्कः ।

तत्त्वचिन्तामणिः ।

तथाहि धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति, क्वचिद्वह्निं विनापि भविष्यति । अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात् सर्व्वत्र-स्वक्रियाव्याघातः स्यात् ॥ ६ ॥

अथ तर्कदीधितिः ।

हुताशनरासभादिपदार्थसार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य्य सन्दिग्धे किमेतानि सर्व्वाण्येव कारणानि, किम्बा कानिचित्तथा, कानिचिन्नेति, अत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो-

---

अथ तर्कदीधिति-प्रसारिणी ।

व्यभिचारज्ञानाभावाय कारणताग्राहकं तर्कं प्रदर्शयतो मूलस्यासङ्गतिं परिहरन्नवतारणिकामारभते, हुताशनेत्यादिना सन्देहस्यैव विवरणं, किमेतानीति । आपादकविशेषणविशेष्योभयं सार्थकीकर्त्तुम् एतावान् प्रयास इति ध्येयम् । तत्र चेति तथाच तादृशशङ्कायामीदृशतर्कावतारो घटत एवेति भावः । तत्र चाका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्य्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य, चोपादानं नियमतः कथं कुर्य्यात्, तेन विनापि तत्सम्भवात्॥ ६॥

धूमोत्पत्तिमुपलभते तस्याहेतुत्वमेवावधारयति तथा रासभादेर्य्यस्य व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति, तस्याकारणत्वमेव निश्चिनुते, तथा वह्नेः तत्र चाकारणत्वसन्देहो विरोधितामासादयन्निवर्त्तते येन तर्केण तमाह धूम इत्यादि। अनुसन्धेयश्चावश्यं कार्य्यकारणभावग्रहः, तदधीनत्वाद्व्याप्तिबुद्धेः सामानाधिकरण्येनान्वयव्यतिरेकग्रहात् जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेद-

---

रणत्वसन्देहो विरोधितामिति उपाध्यायमतमभिप्रेत्य, इतरथा तत्र सामग्री वोध्या, ननु मूलासङ्गतिस्तदवस्थैवेत्यत आह, अनुसन्धेयश्चेति। अपेक्षणीय इत्यर्थः। तथाच धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात् इति व्याप्तिग्राहके इष्टापत्तिशङ्कायामुपयुज्यत इति भावः, (१) कारणताग्रहस्यैव व्याप्तिग्रहत्वं व्यवस्थापयति, सामानाधिकरण्येनेति, तथैव सामानाधिकरण्येनैव गृह्णतो विषयी कुर्व्वतः, तस्यैव ज्ञानस्यैव,

---

(१) इं, अपेक्षणीय इत्यादि इति भाव इत्यन्तपाठो नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कत्वात्, विपर्य्यये तत्कोटिमात्रपर्य्यवसायिनश्च तर्कस्य तदभावकोटिकशङ्कानिवर्त्तकत्वम् अन्यथा धूमो यदि वह्नितच्छून्यजन्यान्यतरो न स्यात् तदा जन्यो न स्यादित्यादेरपि तथात्वापत्तेः, तथा पर्य्यवसायिता च क्वचिद्विशेषतो व्याप्त्या सामान्यतोऽपि क्वचित्पक्षधर्म्मतावत्वात् तत्सम्पत्तये चात्र वह्न्यसमवहिताजन्यत्वेन पक्षो विशेष्यः, विशेषणवत्वेनोपस्थितेर्विशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलम्बित्वात्, तथोपस्थितिविरोधि

व्याप्तिपरिच्छेदकत्वात्, व्याप्तिविषयत्वात्, वह्न्यसमवहिताजन्यत्वं पक्षेऽपि दातुं प्रणालीमाह, विपर्य्यय इति। तत्कोटीति। यदा यत्प्रकृतं तदित्यर्थः, मात्रपदेन तदभावव्युदासः। इदमेव व्यवस्थापयति, अन्यथेति। तथात्वापत्तेः जन्यत्वशङ्काप्रतिबन्धकत्वापत्तेः, तच्छून्यत्वं वह्न्यभावसमवहितत्वं न च तद्वृत्तिभिन्नत्वाप्रसिद्धेरन्यतरत्वाप्रसिद्धिः, वह्निव्याप्तिकारणस्तोमस्यैव तथाविधस्य सत्त्वात् न च। तथापि नान्तरीयके व्यभिचारः, तावतापि प्रकृते प्रयोजनस्याप्रत्यूहत्वात्। केचित्तु वह्निर्वह्निसमवहितः तच्छून्यं तदभावसमवहितं तदुभयजन्यान्यतरो न स्यादिति च योजना, अतएव क्वचित्पुस्तके तथैव पाठ इत्यप्याहुः। तथा पर्य्यवसायिता तत्कोटिमात्रपर्य्यवसायिता। क्वचिदिति। स्वयं वक्ष्यमाणतर्के इत्यर्थः। तथोपस्थितीति। तादृशविशिष्टपक्षोपस्थितीत्यर्थः। नन्वत्र तर्के

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चावह्नेरित्यादिशङ्काद्वयमग्रे निरसनीयम् । वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं वह्न्यसमवहिताजन्यञ्च सम्भवतीति वह्निजन्यत्वपर्य्यवसितं वह्निसमवहितजन्यत्वं वाच्यम् । तथाच घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम्, अजन्ये जन्ये च नान्तरीयके व्यभिचारवारणाय जन्य इति तदर्थस्तु वह्न्यसमवधानकालीनवह्नितत्समवधाने-

---

यदि वह्निसमवहितजन्यो न स्यादित्यत्र वह्निसमवहितजन्यत्वं यदि वह्निजन्यत्वं तदानान्तरीयके व्यभिचारः ।

अथ वह्निविशिष्टकारणस्तोमजन्यत्वं तदोद्देश्यस्य वह्निजन्यत्वस्यासिद्धिः । किञ्च वस्तुतो विशिष्टाभावावगाहिनोऽपि विपर्य्ययस्य विशिष्टाभावत्वेनैव विषयता, तथा चासङ्गतिः, एवं वह्न्यसमवहिताजन्यत्वस्योभयत्र प्रवेशे गौरवादाह, वस्तुत इत्यादि । तादृशतर्के पक्षधर्म्मताबललभ्यस्यापि साध्यस्यान्यथासिद्धिं प्रदर्शयति, वह्न्यजन्यमपीति । अतएव वह्न्यसमवहिताजन्यमित्यपि पाठः, तस्य पक्षतावच्छेदकवैशिष्ट्यस्फोरकत्वात्, शुद्धवह्निसमवहिताजन्यत्वाभावस्य घटादिसाधारणत्वात्, आपाद्यकोटीति । जन्यत्वे विशेषणमित्यर्थः । क्रमेण शुद्धस्य विवक्षितस्य च व्यावृत्तिं प्रदर्शयति, अजन्य इति । विवक्षितमेवाह, तदर्थस्त्विति । जन्यत्वप्रवेशे गौरवादाह, तथाविधेति । निष्कृष्टं तद्दर्शयति तथाचेत्यादि सत्यन्तार्थ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तरयावत्कारणजन्यत्वं, तथाविधयावत्कारणकत्वमिति यावत्, तथाच वह्न्यसमवहिताजन्यत्वे सति वह्न्य-

---

व्यावृत्तिस्तु स्वयमुक्तैव। नान्तरीयके वह्नितत्समवधानेतरयावत्कारणत्वस्य सत्वादाह, वह्न्यसमवधानकालीनेति। वह्न्यसमवधानकालीनयावत्कारणत्वाभावस्य धूमे सत्वादिष्टापत्तेराह, वह्नीति। एकैकदाने तथाचेष्टापत्तिरित्यत उभयं वह्निसमवधानं वह्निकारणतानिर्व्वाहकप्रत्यासत्तिः। न च वह्निव्याप्यं नान्तरीयके व्यभिचारतादवस्थ्यं, तत्र हि तत्समवधानेतरस्य धूमस्य वह्न्यसमवधानकालीनत्वाभावादेव व्यभिचारवारणमिति, अतएव वह्नेः स्वातन्त्र्येणापि निर्द्देशः।

इन्धनादेर्वह्न्यसमवधानकालीनत्वान्नान्तरीयके व्यभिचारतादवस्थ्यमित्यतो यावदिति। नन्वत्र तथापीष्टापत्तिः, यावत्कारणमध्यपतितस्य धूमावयवस्य वह्न्यसमवधानकालीनत्वाभावात् इति। अत्राहुः धूमस्य दध्यादितुल्यतया धूमद्व्यणुक एव वह्निजन्यत्वं यदभिप्रायेणैतस्य तर्कस्यावतार इति तस्यावयवः परमाणुरूपो वह्न्यसमवधानकालीन एवेति, न तत्रेष्टापत्तिरिति। न चान्वयव्यतिरेकप्रदर्शनं स्थूलमादायविरुद्धमिति वाच्यम्, स्थूलान्वयव्यतिरेकस्यैव परम्परया तदनुमापकत्वेनैव उपयोगित्वादिति केचित्। परे तु यावत्कारणव्यक्तेर्वह्न्यसमवधानकालीनत्वं न धूमस्थलेऽपि वह्निसमनियतेन्धनादिव्यक्तेर्वह्न्यसमवधानकालीनत्वाभावादतो यावत्त्वं कारणतावच्छेदकस्यैव विशेषणं, तथाच

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समवधानकालीनवह्नितत्समवधानेतरयावत्कारणको न स्यादिति पर्य्यवसितोऽर्थः। यत्तु नान्तरीयवह्निके व्यभिचारवारणाय आपादककोटाविव विशेषणं सत्यन्तार्थः, स च वह्न्यघटितसामग्र्यजन्यत्वमिति तन्न प्राक् तदसिद्धेः॥ ६॥

यावन्ति कारणतावच्छेदकानि तदालिङ्गितस्यैव प्रत्येकं वह्न्यसमवधानकालीनत्वं वक्तव्यम्। एवञ्च धूमं प्रत्यपि धूमावयवत्वेनैव न कारणत्वं अवयवत्वस्य समवायिकारणतया आत्माश्रयात्, किन्तु दध्यादाविव पृथिवीत्वेनैव, रूपविशेषादिस्तु दध्यादौ रसविशेषादिरिव सहकारीति नातिप्रसङ्गः। तथाच पृथिवीत्वावच्छिन्नस्य वह्न्यसमवधानकालीनत्वान्नानुपपत्तिरिति समादधिरे। न चार्द्रेन्धनक्रियाध्वंसे क्रियानन्तरोत्पत्तिकेन वह्निना सह यः संयोगस्तज्जन्ये व्यभिचारः, भावत्वेन विशेषणात् (१) आपादककोटाविति वह्निजन्यत्वाभावरूपे वह्निसमवहिताजन्यत्व इत्यर्थः। वह्न्यघटितेति। अत्र तदघटितत्वं तदविषयकप्रतीतिविषयत्वं, वह्निघटितसामग्र्या वह्न्यविषयकप्रतीत्यविषयत्वात्। प्रागिति धूमे वह्निजन्यत्वसंशयदशायां वह्निघटितसामग्र्यजन्यत्वस्य। ग्रहीतुमशक्यत्वादिति सिद्धे वह्निजन्यत्वे पक्षविशेषणीभूतवह्न्यघटितसामग्र्यजन्यत्वस्य निश्चयः, निर्णीते च तस्मिन् पक्षधर्म्मताबलात् वह्निजन्यत्वस्य निर्णय इत्यन्योन्याश्रयः, तेन च स्वमतेऽपि

(१) इदं, नचेत्यादिः विशेषणादित्यन्त पाठस्तु सर्व्वस्मिन् पुस्तके नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकं शङ्कायां न नियतोपादानं नियतोपादाने च न शङ्का, तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने

अत्राद्या द्वयी शङ्का इष्टापत्तिपर्य्यवसायिनी, द्वितीया पुनरापादकाद्यप्रसिद्धपर्य्यवसायिनी, अवह्नेः वह्निशून्यात् तदुपादानमिति करणव्युत्पत्त्या तदीयकार्य्यप्रयोजकताज्ञानपरम् तादृशान्वयव्यतिरेकानुविधानबोधपरं वा अग्रेतनमपि स्वक्रियापदं तत्परमेव कृत्यादेः शङ्का प्रतिबन्धकत्वे मानाभावात् कारणताग्रहोत्तरकालीन-

---

वह्निसमवहिताजन्यत्वं दुर्ग्रहं, धूमविशेषे वह्न्यभावविशिष्टकारणाजन्यत्वस्य सुग्रहत्वादिति अस्मन्मते तस्यैव पक्षत्वादिति ॥ ६ ॥

अत्रेति । स्वविवक्षिततर्केत्यर्थः । इष्टापत्तीति । उभयथापि वह्न्यसमवहिताजन्यत्वविशेषणाभावाद्बोध्या । आपादकादीत्यादिपदेनापाद्यपरिग्रहः । ननु अवह्नित्वं वह्निभिन्नत्वं, तथाच वह्निभिन्नजन्यत्वेऽपि वह्न्यसमवहिताजन्यत्वं स्यास्यतीति कुत इष्टापत्तिरित्यत आह, अवह्नेरिति । उपादानपदस्य भावव्युत्पन्नतया कृतिप्रसिद्धतया विवक्षितासिद्धिरित्यत आह, करणेति । तदीयकार्य्यं धूमादि । ननु प्रयोजकत्वस्यान्यथासिद्धिचतुष्टयाभावप्रवेशे गौरवादाह, तादृशेति । नियतेत्यर्थः । कृत्यादेरित्यादिना क्रियापरिग्रहः । ननु कारणत्वग्रहान्यथानुपपत्तिरेव मानमत आह, कारणतेति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वक्रियाव्याघातो न भवतीति, न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्य्यार्थं नियमत उपादत्ते, तत्-कारणं तन्नेत्याशङ्कते चेति, एतेन व्याघातो विरोधः,

---

त्वाच्च। यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वह्ने-र्जनकत्वं नायाति तृणारणिमणिन्यायेन वैकल्पिक-कारणतायामपि तथात्वसम्भवात्। तथापि विशेषाणां कार्य्यकारणभावग्रहस्तर्केण न तद्विरोधशङ्कायामपनी-तायां जायमानः, सामान्यव्यभिचारानिर्णयानुगतागुरु-विशेषरूपान्तरानुपस्थितिलाघव-प्रतिसन्धानादि-वशात् सामान्यत एव तं परिच्छिनत्ति, प्रामाणिकी च तथैवा-

---

ननु वह्निसमवहिताजन्यत्वं धूमविशेष एव निरटङ्कीति तस्यैव पक्षत्वं तत्कुतः सामान्यतः कारणताग्रह इति शङ्कते, यद्यपीति। तथात्वं विशेषे नियतान्वयव्यतिरेकानुविधायित्वम्। अपनीताया-मिति। विशेषे नियतान्वयव्यतिरेकानुविधायित्वरूपव्यावर्त्तकधर्म्म-दर्शनादित्यादिः। सामान्येति। तेन द्रव्यत्वनिरासः। अनुगतेति। न तद्धूमत्वनिरासः, अगुर्विति। तेन चक्षुःकटुजनकद्रव्यत्वादि-निरासः, सामान्यत एव धूमत्वेनैव तत्कार्य्यकारणभावं परिच्छेदो विषयिकरणं प्रामाणिकी प्रमाणकी, तथैव तादृशसामग्रीसम-वधानेनैवाप्रामाणिकी प्रमाणसिद्धौ तथैव सामान्यत एवंत्यपि, केचित्तु ननु सामान्यतो व्यभिचारग्रङ्कासत्त्वे कथं ग्रह इत्यत आह,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स च सहानवस्थाननियत इति तत्राप्यनवस्थेति निरस्तं स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात्। अतएव व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्॥ ७॥

न्वयव्यतिरेकौ, फलबलेन लाघवज्ञानादिशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते। अपरे तु धूमत्वावच्छिन्नस्य वह्न्यजन्यत्वेन जन्यत्वविशिष्टस्य यथाश्रुतवह्न्यसमवहिताजन्यत्वस्य व्यतिरेक एवापादनीयः तच्चोक्तन्यायेन तादृशवह्नियुक्तकारणकलापजन्यत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासात्, वह्नि-

---

फलबलेनेति। तथाच लाघवज्ञानमुत्तेजकमिति। उक्तसामग्रीव्यतिरेकेऽपि धूमत्वावच्छिन्नस्यैव प्रथमत एव वह्निजन्यत्वग्रह इति ये वर्णयन्ति तन्मतमाह, अपरेत्विति। यथाश्रुतेति। तेन प्रगल्भमतनिरासः, एतत् सिद्धतर्कस्य धूमत्वावच्छिन्नो धूमो यदि वह्निजन्यो न स्याज्जन्यत्वे सति वह्न्यसमवहिताजन्यो न स्यादित्येवं रूपः, वह्न्यसमवहिताजन्यत्वस्य विशिष्टत्वानुधावनं प्रामाण्यख्यापनाय तेन तन्निर्णयस्यैव शङ्काप्रतिबन्धकत्वं, अतएवोपादानपदमपि अग्रे तत्परतया व्याख्यास्यते, धूमत्वावच्छिन्नत्वस्यैव वह्न्यसमवहिताजन्यत्वं ग्राहयति, तच्चेति। अग्रे सुग्रहमित्यनेनान्वितम्। उक्तन्यायेनेति आभासोक्तन्यायेनेत्यर्थः। तदिति। वह्नियुक्तकारण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विरहेऽपि निरतिशयस्यैव तादृशसमूहस्य धूमजनकत्व-सन्देहस्य च तथाविधात् धूमानुत्पाददर्शनेनैवायोगात्, तादृशस्यैव क्वचिद्वह्निं क्वचिच्चेतरदासाद्यजनकत्वसम्भावनायाश्च क्वचिद्धूमानुत्पादप्रयोजकत्वेनावधृतस्य वह्नि-विरहस्यैव तथाविधसमूहत्वे धूमानुत्पत्तिसामान्यं प्रति लाघवात्, प्रयोजकत्वनिर्णयेनापनयान्मनसैव सुग्रहं, वह्नेर्वह्निसमवहितस्योपादानम् ॥ ७ ॥

कलापेत्यर्थः। अस्यैव कलापस्य वह्न्यसमवहिततादशायां जन्यत्व-शङ्कां निरस्यति, वह्निविरहेऽपीति। निरतिशयस्य निर्विशेषितस्य, तथाविधान्न वह्न्यसमवहितात्। तादृशस्यैव तथा कलापस्यैव कालिकसमवधानव्युदस्य दैशिकं व्युदस्यति, क्वचिच्चेतरदिति। सम्भा-तादृशस्तोमस्यैव वह्न्यभावदशायामित्यर्थः। अपनयादिति। सम्भा-वनाया इत्यनेनान्वितम्। केचित्तु अवह्नेरित्यादिशङ्काया आद्य-दलेन निरासः। क्वचिद्वह्निं विनेत्यस्याः शङ्कायाश्च वह्निविरहे-ऽपीत्यादि द्वाभ्यां निरासः इत्यर्थमाहुः। तच्च तादृशशङ्कयोर्मूल-क्तता तर्क एवोत्थापयिष्यमाणतया सन्दर्भविरुद्धमिति। धूम-सामान्येन वह्निरिन्द्रियलौकिकसन्निकर्षाभावात् तद्विशेष्यकज्ञाना-सम्भवादाह, मनसेति। ननु वह्नेरेवेत्यत्र वह्निभिन्नानुपादानं प्राप्तं, तच्च न शङ्काप्रतिबन्धकमिति वह्न्यसमवहिताजन्यत्वमेव शङ्का-प्रतिबन्धकतया विवक्षन्नाह, वह्नेरिति ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुत इति खण्डनकारमतमप्यपास्तम्। न हि व्याघातः शङ्काश्रितः, किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति न वा

अत्र च नियमव्यवच्छेद्यस्य वह्न्यसमवहितानुपादानस्य प्रयोजके तदजन्यत्वज्ञाने परम्परया वह्निसमवहितोपादानस्य वा प्रयोजके तत्र तात्पर्य्यम्। यत्त्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव विशेषदर्शनतयाशङ्काप्रतिबन्धकं तदेव तर्कघटकं, तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमितीति तन्न, यादृच्छिकस्य

ननु तथाप्युपादानं कथं प्रतिबन्धकमित्यत आह, अत्र चेति। तथाच वह्निसमवहितस्य नियमत उपादानं कथं कुर्य्यादिति मूले कथमित्यत्र यो नियमव्यवच्छेदस्तद्विषयस्य वह्न्यसमवहितानुपादानस्य प्रयोजक इत्याशयः कल्पः। एतेन वह्न्यसमवहितस्योपादानमेव नियमव्यवच्छेद्यं, न तु वह्न्यसमवहितानुपादानमित्यसङ्गतिप्रदर्शनं परास्तम्। ऋजुमार्गेण वह्न्यसमवहिताजन्यत्वज्ञानमेव मूलतात्पर्य्यविषयतया व्याचक्षाणः कल्पान्तरमाह, परम्परयेति। वह्न्यसमवहितताजन्यत्वे ज्ञाते तर्कः तर्के च सति वह्निजन्यत्वज्ञानं तस्मिन् सति वह्निसमवहितस्योपादानमित्येवं रूपया। तत्र वह्न्यसमवहिताजन्यत्वज्ञाने, विशेषेति। व्यावर्त्तकेत्यर्थः। यादृच्छिकस्य यत्किञ्चिद्वह्निनिष्ठस्य,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषदर्शनात् क्वचित् शङ्कानिवृत्तिरेवं स्यात्, न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः, न तु स स्वत एव प्रयोजकः, अतएव न तदाहित-

---

तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेद-सम्पादकत्वादिति वदन्ति तच्चिन्त्यम्। केचित्तु कार्य्यकारणभावग्रहानन्तरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशङ्कानिरासार्थमयं तर्कः, तथाच धूमो यदि सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्न्यजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यात्, वह्निजन्यो न स्यात्। अप्रत्यासन्नस्याजनकत्वात्,

---

व्यभिचारित्वात् अव्यावर्त्तकत्वात्, नियतस्य तद्धर्म्मावच्छिन्नस्य, उक्तेति। धूमत्वावच्छिन्नकारणत्वं यथा प्रागगृहीतं तथा तद्धर्म्मावच्छिन्नान्वयव्यतिरेकानुविधायित्वमित्यर्थः। उक्तं तच्चोक्तन्यायेनेत्यादिना तदभेदपर्य्यवसानान्न मतभेद इति केचिन्न, तन्न दूषणसङ्गतिश्चिन्तनीया तच्चिन्त्यमिति। नान्तरीयके व्यभिचारादिति। यदि प्रागुक्तविवक्षाया नान्तरीयके व्यभिचारो व्युदस्यते, तदा धूमानुत्पत्तिं प्रति वह्निविरहप्रयोजकत्वं यदुक्तं तच्छैथिल्यमेवानेनोक्तमित्यन्ये। लाघवज्ञानस्यावश्यकत्वे उक्तलाघवज्ञानाजन्यत्वग्रह एवास्तु किमनेनायासेनेत्यर्थः। इत्यपि कश्चिन्नान्तरीयके व्यभिचारं प्रकारान्तरेण खण्डयतामतमाह, केचित्त्विति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कारो न मानान्तरं तर्कस्याप्रमात्वात्, तच्च प्रत्यक्ष-व्याप्तिज्ञाने हेतुः, तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात् ॥ ८ ॥

तादृशाजन्यत्वञ्च प्रत्यासत्त्यन्तरशालिवह्निसत्त्वेऽपि धूमानुत्पादादिना ग्राह्यमिति इदमेव च वाचोभङ्ग्या परे परिष्कुर्वन्ति, धूमो यदि वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति वह्न्यधिकरणदेशोत्पत्तिको न स्यात् जन्यो न स्यात्। तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिं प्रति वह्निसम्बन्धाभावस्य प्रयोजकत्वे ग्राह्ये उपस्थितत्वाल्लाघवाच्च, तादृशसम्बन्धाभावस्यैव तथात्वावधारणादिति तच्चिन्त्यम्। मिश्रास्तु परं प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघा-

---

प्रत्यासत्त्यन्तरेति। सामानाधिकरण्यातिरिक्तेत्यर्थः। इदमेव चेति। व्यधिकरणस्य जनकत्वशङ्कानिरासरूपमुख्यप्रयोजनस्योभयत्र तुल्यत्वादित्यर्थः। तादृशसम्बन्धः सामानाधिकरण्यम्। तथात्वं प्रयोजकत्वम्। तच्चिन्त्यमिति। उक्तयुक्त्या वह्निजन्यत्वस्यैव प्रागेव सामानाधिकरण्यार्थविषयत्वादिति तादृशलाघवज्ञानस्य वह्निजन्यत्वग्रह एव सहकारित्वकल्पनस्तु किमेतावताप्रयासेनेत्यपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ननु सहचारदर्शनव्यभिचारादर्शनवद्व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेन्न स्वरूपसतोरेव तयो र्व्याप्तिग्राहकत्वात्, सत्तर्काद्व्याप्तिप्रमा तदाभासात्तद-

---

तोऽयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्य्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयोर्व्याहन्येरन् यदाह न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः। तच्चेति। तत् व्यभिचारादर्शनं व्यभिचारज्ञानसामान्याभावः योग्यतादिसन्देहेऽपि शब्दादिना अर्थनिश्चयात् तत्तर्कस्वरूपमिति केचित्॥ ८॥

ननु वस्तुतो व्याप्तिसत्त्वे तर्काभासात्प्रमाभ्रमयो-

कश्चिन्न। परं चार्व्वाकं, मूलं व्याप्ति शैथिल्यं, तत्र तर्काद्यनवतार उपदर्शनमेवाह, मैवमिति। ग्रन्थसम्मतिं दर्शयति। यदाहेति। प्राहुरिति। तथाच उपादानपदस्य सम्मुख्यार्थंत्वमेव प्रकर्षः। व्यभिचारज्ञानेति। शब्देऽपि व्यभिचारज्ञानस्य प्रतिबन्धकत्वात् सामान्यपदम्। योग्यतादीति। तथाच तज्ज्ञानसामान्याभावस्तत्र न हेतुरिति भावः। स्वरूपमिति। नपुंसकत्वनिर्व्वाहार्थम्॥ ८॥

तर्काभासादिति। धूमो यदि वह्निव्यभिचारी स्याद्व्यं न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव। अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं, तत्र तर्कान्तरा-

---

रुत्पादानुत्पादाभ्यां व्यभिचार इत्यत आह। विशेषदर्श-नेति। तथाच यथा तस्य बोध्यतदभावतद्विषयत्वे सत्यत्वासत्यत्वे तथा तर्कस्यापीति, अत्र च सत्यत्वादि-सम्पादके धर्म्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्म्मि-सन्निकर्षे वा तात्पर्य्यं लाघवात्, तर्कस्य व्यभिचारेणा-हेतुतायाः स्वयमेव दर्शितत्वाच्च। अथ विपरीत-ज्ञानोत्तरप्रत्यक्षे तन्निवर्त्तकत्वेन विशेषदर्शनस्य हेतुत्वं

स्यादित्याकारात्मकादित्यर्थः। व्यभिचार इति। आद्यस्य व्यति-रेकव्यभिचारोऽन्त्यस्यान्वयव्यभिचार इत्यर्थः। बोध्येति। विशेषा-दर्शनस्य सत्यत्वे यत्र पदपाद एवकारभ्रमो ज्ञातस्तत्र व्यभिचार इति इदमुक्तमिति भावः। ननु व्याप्तिमत्तर्कस्य प्रमाहेतुत्वा-पेक्षया व्याप्तिमत्वमेव प्रयोजकमस्त्वित्यभिप्रायेणाह, अत्र चेति। ननु व्याप्तेर्लौकिकप्रत्यक्षाविषयत्वं प्राप्य यथा व्यवस्थापितं प्रागेव, तथाचालौकिके तज्ज्ञाने व्याप्तेः कथं कारणमित्यत आह, बोध्या-दीति। ननु सन्निकर्षः क्वचित्तज्ज्ञानं, यत्र च लौकिकप्रत्यक्षं तत्र च संयुक्तसमवायादिरित्यतोऽननुगमात्तदपेक्ष्य तर्कस्यैव तथात्वमस्तु इत्यत आह, तर्कस्य चेति। दर्शितत्वादिति। यत्र व्याघातादिना शङ्काया अभावस्तत्रैवेत्यर्थः। विपरीतेति। भ्रमसंशयोत्तरेच्छा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पेक्षा, यत्र तु व्याप्तिस्मरणं हेतुः, तत्र न तर्कान्तरापेक्षेति नानवस्था, अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात् तन्मूलानुभवमूलाचाग्रेऽपि व्याप्तिस्मरणपरम्परेति। यत्त्वनादिसिद्धकार्य्यकारणभावविरोधादिमूलाः केचित्तर्का इति तन्न, तत्र प्रमाणानु-

---

तच्च तर्कस्यापीति चेत्। अस्तु तावदापाततस्तथा, तथाप्यन्यत्र क्लृप्तप्रामाण्यादिप्रयोजकादेव तच्च प्रामाण्याद्युपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात्। उक्तञ्च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वमते सर्व्वत्र विशेष्यसम्बन्धासम्बन्धज्ञानमेव प्रमाभ्रमप्रयोजकमिति वदन्ति। तत्र प्रमाणेति इदमनादिसिद्धत्वज्ञानस्य

प्रत्यक्षे इत्यर्थः। तन्निवर्त्तकत्वेनेति। भ्रमादिविरोधित्वेनेत्यर्थः। आपातत इति। तादृशप्रत्यक्षत्वं कार्य्यतावच्छेदकमेव न अव्यवहितत्वस्यावश्यकत्वेन तत्तद्व्यक्तित्व एव विश्रामात् अर्थवशसम्पन्नत्वाच्चाऽभ्युपेत्य समाधत्ते, तथापीति। अन्यत्रेति। बोध्यादिमत्सन्निकर्षत्वं नैकमित्युक्तं प्रागित्यत आह। उक्तञ्चेति। विशेष्यसम्बद्धं यद्विशेषणं तस्य ज्ञानमित्यर्थः। ननु पूर्व्वपक्षे कार्य्यकारणभावे वास्तवमनादित्वमुक्त्वा दूषणे प्रमाणगवेषणं मूल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगेऽनुमान एव पर्य्यवसानात्। न च व्याप्तिग्रहा- asc. 1-21 1/8/
न्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्यकत्वज्ञानमिति वाच्यम् अनुपपत्तेरप्यनुमानत्वात्। अन्ये तु विपक्ष-बाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति तदपि न तर्कस्याप्रमाणत्वात्।

प्रयोजकत्वमभिप्रेत्य परार्थाभिप्रायेण वा अनुमानत्वात् व्याप्तिग्रहाधीनप्रवृत्तिकत्वात्। व्यभिचारशङ्केति द्वारेण द्वारिणो नान्यथासिद्धिरिति भावः। अनुमानमात्र इति अनिश्चितसाध्यपक्षके सर्व्वत्र सम्भवित्वात्, पक्षे साध्यनिर्णयेऽनुमानवैयर्थ्यात्, उपाधित्वेन स्वव्यभि-चारेण व्यभिचारोन्नायकत्वेनानुमानमात्रोच्छेदकता-ज्ञानमेव साध्यव्यापकताबुद्धिं विरुन्ध्यादित्याशङ्क्याह,

---

कृताकृतं तच्च न घटत इत्यत आह, इदमनादीति। अभिप्राय-शङ्कोचादाह, परार्थेति। तथाच प्रमाणमवश्यमेव गवेषणीय-मित्यर्थः। स्वमतेऽर्थापत्तेरतिरिक्तप्रमाणत्वमभिप्रेत्य मूलं तत्साधा-रण्येन योजयति। व्याप्तिग्रहेति। ननु यत्र पक्षे साध्यनिश्चयो जातस्तत्र पक्षेतरस्यानुपपत्त्यानुमानमात्रमिति मूलं न घटत इत्यत आह, अनिश्चितेति। अनिश्चितसाध्यके साध्यनिश्चयार्थमनुमान-कल्पने सामाग्रीबलान्निश्चितसाध्यकेऽपि तत्कल्प्यत अनिश्चितसाध्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	As.
•Markandeya Purana, Fasc. 5-7 @ /10/ each ...		
*Mīmāṁsā Darçana, [illegible] @ /10/ each		
*Nyāyavārtika, Fasc. 1--6 @ /10/ each ...		
*Nirukta, Vol. IV. fasc. 1-8 @ /10/ each ...		
*Nitisara, Fasc. 3-5 @ /10/ each ...		
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each ...		
Nityācārapradīpaḥ Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ [illegible]		
Nyayabinduṭīkā, Fasc. 1 @ /10/ each ...		
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /[illegible] ...		
Nyayasarah ...		
Padumawati, Fasc. [illegible] @ 2/ ...		
*Pariçiṣṭa Parvan, Fasc. 3--5 @ /10/ each ...		
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each ...	4	[illegible]
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each ...	3	[illegible]
Ditto (English) Part II, Fasc. 1 @ 1/- ...	1	[illegible]
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each ...	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each ...	12	8
Parāçara, Institutes of (English) @ 1/- each ...	1	0
Pariksamukha Sutram ...	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each ...	3	12
Rasarnavam, Fasc. 1-3 ...	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each ...	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/ ...	1	14
Sāṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each ...	2	8
Ditto (English) Fasc. 1–3 @ 1/- each ...	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each ...	1	4
Six Buddhist Nyaya Tracts. ...	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each ...	3	12
Sragdharā Stotra (Sanskrit and Tibetan) ...	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each ...	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each ...	2	8
Sundaranandam Kavyam ...	1	0
Suryya Siddhanta fasc. 1 ...	1	4
Syainika Sastra ...	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each ...	9	6
„ Pratisakhya, Fasc. 1-3 @ /10/ each ...	1	4
•Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each ...	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each ...	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each ...	10	0
*Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 1–10, Vol. III, Fasc. 1–2, Part IV. Vol. II, Fasc. 1-12 @ /10/ each Vol. IV. Fasc. 1, Vol. V, Fasc. 1--5,	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each ...	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each ...	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each ...	1	14
Tirthacintamoni, fasc, 1, @ /10/ each ...	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each ...	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each ...	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each ...	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each ...	6	0
Vallāla Carita, Fasc 1 @ /10/ ...	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each ...	3	12
•Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7 @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each ...	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/ ...	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each ...	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each ...	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each ...	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3 ...	3	12
Tibetan Series.		
Baudhyastotrasangraha, Vol. I (Tib. & Sans.) ...	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/ each ...	4	0
Nyayabindu of Dharmakirti, Fasc. 1 ...	1	0
Pag-Sam S'hi Ṭiṅ, Fasc. 1--4 @ 1/- each ...	4	0
Rtogs *brjod dpag ḥkhri S'iṅ* (Tib. & Sans. Avadāna Kalpala Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each ...	15	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0
Arabic and Persian Series.		
Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each ...	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each ...	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

२८८

योगेऽनग

न्या

... @ 1/8/ each	33	0
... Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III ...	36	0
...l. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each	20	0
...by Dr. A. Sprenger, @ /10/	0	10
...Index, Fasc. 1--19 @ /10/ each	11	14
... 1-9 @ /10/ each ... ... Rs.	5	10
...oks and Manuscripts, 1-2 @ 1/- each	2	0
...rsian Books and Manuscripts in the Library of the ...of Bengal. Fasc. 1--3 @ 1/ each	3	0
...rabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
...ashīdī, Fasc. 1–14 @ 1/8/ each	21	0
...Ṭūsi. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...	4	0
...ash-Shām of Wāqidī, Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādi, Fasc. 1--4 @ /10/ each	2	8
...istory of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngīri, Fasc. 1--3 @ /10/ each	1	14
Isābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'ṣāir-i- Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maa'āsir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawārīkh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salātin, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tadhkira-i-khushnavīsān	1	0
Tabaquāt-i-Nāṣiri, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzūk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each 20
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6). 1886 (8), 1887 (7), 1888 (7), 1889 (10, 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S, 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts 1--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0

Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P

24-5-12.